समरसार of रामचन्द्र सोमयाजि
with the commentary of भरत -
Published by गोवर्द्धन राम रामलाल साह [illegible] Loose leaves lithoprint edn., Benares, 1955 Vikram era.

~~1 copy complete~~

~~3 copies~~

40

Careful handling is needed.

1 copy Just title page xerox [illegible]

Bill No. 3/07-08

66

2008-0218

Indira Gandhi National
Centre for the Arts

अथ सोमवाजिरामचन्द्रकृत समरसारभरतकृतटीकासहितम्।

यह पुस्तक शहर बनारस कुंजगली के पश्चिम फाटक पर गोवर्द्धनराम रामलाल साहु के दुकान पर मिलेगी॥

Indira Gandhi National Centre for the Arts

श्रीगणेशाय नमः ॥ अभिवंद्य रामचन्द्रं गुरुं तदुक्तं स्वरग्रंथं ॥ विवृणोमि यथाप्रज्ञं नरभिहितायीनुसारेण ॥ १ ॥ अत्र श्रीरामचन्द्रनामा ग्रंथकृ
द्धारीसित ग्रंथपरिसमाप्तिपारिपंथिप्रत्यूहापोहाय शिष्टाचारपरिपालनाय च गुरुं प्रणमन् चिकीर्षितं प्रतिजानीते ॥ भूरिस्वरशास्त्राणि रुद्रयाम
लादीनि । युद्धशब्द उपलक्षणार्थः ॥ येन वादिप्रतिवादिदंपतिसुभटद्यूतकृन्मल्लादीनामपि जयपराजयोपायप्रतिपादकत्वमस्य ग्रंथस्यधा-

नत्वा गुरुं समालोच्य स्वरशास्त्राणि भूरिशः ॥ वक्ष्ये युद्धजयोपायं धार्मिकानां महीक्षितां ॥ १ ॥ बहुधा विदधे सदाशिवोत्र
स्वरतंत्राणि तदेकवाक्यतां तु ॥ भगवानयमेव वेद सम्यक् गुरुमार्गानुगतो परस्तु लोकः ॥ २ ॥ वक्ष्याम्यहं यदिह किंचन सर्व
सारमेतावदेव परिचिंत्य नृपः प्रवृत्तः ॥ एकोपि कोटिभटलोलपतंगदीप्तिः लीलां मुदानुभवतु स्फुटकौतुकेन ॥ ३ ॥ नैतद्देयं
दुर्विनीताय जातु ज्ञानं गुप्तं तद्धि सम्यक् फलाय ॥ अस्थाने हि स्थाप्यमाने व वाचां देवी कोपान्निर्दहेन्नो चिराय ॥ ४ ॥ विनया
वनताय दीयमाना प्रभवेत्कल्पलतेव सत्फलाय ॥ उपकृत्य तु चिंतकानि शास्त्राण्युपकारस्य पदं हि साधुरेव ॥ ५ ॥ शंमेगं-
गागतिस्ते दहदधितरधः सर्गषंढान्विनाचः कायास्त्रालीष्टतेऽज्जमपि सुभटयोर्नामवर्णोत्थसंख्ये ॥ र्मिकानामितियं १

याप्रमाणशंका निवारणाय ॥ यतः रूपाय प्रवृत्तोपि सपापनृपतिः परिपंथिभिः पराभूयते रावणदुर्योधनवत् ॥ १ ॥ बहुतरस्वरग्रंथविरो-
धं गुरुमतमनुसृत्य परिहरति ॥ २ ॥ ग्रंथस्योपादेयतामाह ॥ ३ ॥ एतत् ग्रंथप्रतिपाद्यसर्वस्वरशास्त्रसारस्यातिगोप्यत्वमाह ॥ ४ ॥ प्रत्ययगम-
नाय साधुप्रदेयतामाह ॥ ५ ॥ संप्रति प्रकृतमाह ॥ इहेयं परिभाषा कयग्रहणे कटपयवर्गैः पिंडाद्यैरंकाः नञ स्व मिति स्वकृतकरणचिंताम-

णिग्रंथादाहनालायवाप॥तत्र शंमेगंगेत्यादिवर्णद्योतितान् पंचादंकानेकादशालीषुऊर्ध्वाधःस्थासु विलिख्यतेषामंकानामधःअ
चःस्वरान् अआइईउऊएऐओऔअंएतान् लिखेत्॥कथमित्यपेक्षायांसर्गषंढान्विनेति॥सर्गोविसर्गःस्वरं।अ इति तेन ऋऌॡ इति
षंढास्तैः-- र्विनेतिसंबंधः॥अत्राज् ग्रहणेनयद्यपिअच्प्रत्याहारगताअइउइत्यादिक्रमेणवर्णालभ्यंते।तथापिसर्वैःषंढान्विने-
तिउक्तलिंगाद्वर्णसमाम्नायस्थास्वराअच्छब्देनविवक्षितादृष्टव्याः॥एषांस्वराणामधःकादीन्वर्णान्ङञकाररहितत्वेनैकत्रिंशत्संख्या
न्सिद्धाष्टालीषुतद्वल्लिखेत् अकढम।आखणयइत्यादि॥अंत्योपांत्यकोष्टद्वयंतुलेख्यवर्णाभावाच्छून्यमेवस्यात्॥एवमिदंजयपराज
यचक्रमुक्तं॥एतत्प्रयोजनमाह॥सुभदयोरिति॥सुभदावन्योन्यप्रहारिणौवीरौ॥अत्रापिसुभदग्रहणमुपलक्षणायपनोजवादिप्रति

स्वासेशेषेप्यशेषेविजयपरिभवौदाप्तिशेषेनवस्ते मासाल्लीकारिजेताक्रमतइहमतोग्र्यो इत्युक्तमाद्यैः ६

वादिनामपिजयपराजयज्ञानमितः अतोयपोर्द्वयोर्जयपराजयौजिज्ञासितौतयोर्नामस्वरव्यंजनानांये।शंमेगगेत्यादिउपरिस्थाअंका-
न्स्वरव्यंजनंचाक्षिपतियथारामरावणयोर्जयपराजयवीक्षायांरामइतिनाम्नोरकाराकारमकाराकाररूपत्वेनचतुरक्षरस्यशाकाराद्यु
परिस्थाश्चत्वारोंकाः गं३मे४शा४शा४एवंसर्वांकमेलनेसंख्या१८रावणनाम्नितुगं३मे४ग३शा४मं४शं४एतदंकमेलनसंख्या२६ए
तेसंख्येपृथक्पृथक्खकारद्योतितद्वांकेनाप्तेभक्तेयन्नामवर्णसंख्यासशेषातस्यजयः यस्यतुनिःशेषातस्यपराजयः॥अत्रयद्यपिद्वेसं
ख्येनिःशेषेतेनराकरावणयोः साम्यमापाति तथापि वक्ष्यमाणचक्रांतरेरामस्यैवजयः प्रागुक्तसंख्ययोरेवप्रकारांतरेणजयपराजयज्ञा

Indira Gandhi National Centre for the Arts

नमाह। दासीति॥ प्राग्वत्तद्वयोर्जयपराजयज्ञानमिश्ंतत्रम: स्वरसंख्येप्राग्वदानीयाष्ट८भिर्भक्ते।जेह्वेषौचेन्नवस्त इत्याद्यंकक्रमेणसंभव-
स्तदाग्निमाग्निमांकतुल्यशिष्टानामसंख्याजेनेतिज्ञेयमंकास्तनाद्योदिता:॥०।४।६।५।७।३।१॥२॥ एषांकेषुक्रमस्येषुयन्नामवर्णसंख्य
ष्टभागशेषोग्निमस्तस्यजय: अस्यतुपूर्वस्तस्यपराजय: यथारामरावणसंख्ये १८।२६। अष्टभक्ते शेषौ २।२अत्रापिसाम्यमेव॥६॥ अपरंजय
पराजयचक्रमिदं॥ तुलारीत्यादौकादशांकास्तिर्यक्कोष्ठेष्वेकादशसु विलिख्यतदध: अकठमआस्वणयइत्यादिक्रमेणवर्णालेख्या:तदनु
मानद्वयास्वरसंख्येतुलारीत्यादौकानुसारादानेयेतेद्वादशसंख्यावियुक्तेकार्येतेतुन: अष्टभिर्विभज्यंपत्संख्याशेषोधिक: सएवजेतासु-

अंकास्तुलारिभजतांधसुगानका:स्वरो १२ यैरितोस्वरमितीरहितेविधाय॥ तस्मात्तुनर्दहतिशेषबहुत्वत:स्यात् जेता ८
सएवबलप:सुधियाविधेय: ॥७॥ वर्गाष्टकांकादशतिथ्यासंकालारितद्युतौ॥ नाम्नो:सभाजितायांस्याद्विजयोधिकशेषके

धियाराज्ञासएवजेताबलप: सेनापति: कर्त्तव्य: उदाहृतिस्तुअत्ररामरावणनाम्नास्वरसंख्येप्राग्वत्साधितेयथाराम १७रावण २८एतेसं-
ख्येद्वादशोने ५।१६।एतेष्ट८हृतेशेषौ ५।०अत्रश्रीरामचंद्रोजेता॥७॥ अथापरंजयपराजयचक्रमाह अकचटतपयश:कला१६भूते५षु
५बाणा५स्व५शर५वेदा४ब्धि४संख्यास्वरा: अष्टौवर्गा: तेषांसंबंधिनोंका: दशास्याद्या: अष्टौविवादास्पदीभूतजयप्रतिद्वंद्विद्वयनाम्नो:सं
बंधिवर्णवर्गांकोनीयुतौसप्तभिर्भाजितायांयन्नामवर्णांकशेषोधिक:सविजयतेअल्पशेषस्तुपराभूयतेउदाहृतिर्यथाअस्मिन्तृतीयजय २
पराजयचक्रेरामरावणनाम्नास्वरसंख्याजीयतेरेफ:सप्तवर्गीयस्तस्यांकोलकारद्योतित: ३ अकार: प्रथमवर्गीयस्तस्याष्टांकोदकारद्यो-

Indira Gandhi National Centre for the Arts

तितः ८ मकारः षष्ठः वर्गीयत्वात्ककारयोतिनैकांकः १ अकारः प्राग्वरष्टांकः ८ एवंरामनामवर्णसंख्या २९ रावणस्यतु ३४ द्वयोः सप्तम-
भागेशेषे ६।६ अत्रसमशेषत्वादुभयोः साम्यं ॥ ८ ॥ इतिश्रीरामचन्द्रविरचितसमरसारसंग्रहटीकायां भरतविरचिता यांजयपराजयचिंता
समाप्ता ॥ अथनक्षत्रतिथिवारैः कुलाकुलगणांसंधिजयपराजयनिमित्तमाह ॥ मूलं १ आर्द्रा २ अभिजित् ३ अंबुपोवरुणास्तद्दैवत्यंभंशतभि
षक् ४ एतानिचत्वारिभानिदशमीषष्ठीद्वितीयातिस्रस्तिथयः ॥ बुधवासरश्चअयंकुलाकुलगणः राज्ञोर्युयुत्सोः संधिकरः द्वयोर्युद्धनिवृ-
त्याप्रीतिंकरोति अस्मिन्गणेयुद्धाद्यारंभेसंधिर्भवतीत्यर्थः। कुलगणस्तुवक्ष्यमाणः स्थाय्योः स्थायिनोदुर्गाधीशस्यजयार्थंजयकारीस्यादि-

मूलार्द्राभिजिदंबुपोदशमीषष्ठीद्वितीयाबुधोराज्ञोः संधिकरः कुलाकुलगुणः स्थाय्योर्जयार्थंकुलः ॥ मासाख्यास्थित
भानिशेषतिथयोयुग्माः कुजोभार्गवः संयोन्योकुलसंज्ञकोविजयतेयस्मिन्प्रयातोध्रुवं ॥ ९ ॥

त्यर्थः सचकुलः मासाख्यास्थि
तभानिचित्राविशाखाज्येष्ठापूर्वाषाढाश्रवणपूर्वाभाद्रपदाऽश्विनीकृत्तिकामृगशिरःपुष्यमघोत्तराफाल्गुनीसंज्ञानिद्वादशभानि। चतुर्थी
अष्टमीद्वादशीचतुर्दशीतिचतस्रस्तिथयोदशम्याद्यपेक्षयाशेषभूतायुग्माश्चभौमशुक्रवासरौचअयंसर्वः कुलगणः स्थायिजयकृत् अ
न्यः एतस्मादुक्तभतिथिवारव्यतिरिक्तोगणः अकुलसंज्ञः सचभरणीरोहिणी २ पुनर्वसु ३ आश्लेषा ४ पूर्वाफाल्गुनी ५ हस्त ६ स्वाती ७ अनु-
राधा ८ उत्तराषाढा ९ धनिष्ठा १० उत्तराभाद्रपदा ११ रेवती १२ एतानिद्वादशभानिप्रतिपत्तृतीयापंचमीसप्तमीनवमीएकादशीत्रयोदशीपंच
दशीतिथयः रविसोमगुरुशनिवाराश्चायमकुलगणः अस्मिन्गणेप्रारब्धयुद्धादिः प्रयातोपायीध्रुवंनिश्चयेनविजयतेइतिफलं ॥ ९ ॥

Indira Gandhi National Centre for the Arts

इतिसमरसारेसंग्रहटीकायांकुलाकुलाकुलगणः समाप्तः॥ अथसकलस्वरशिरोमणिंवर्गस्वरमाह॥ अणएङ्एतौप्रत्याहारौतत्संगृहीताः अइउएओएतेपंचस्वराः कछडधभवएतन्मुखेष्वेतदादिषु वर्णेषुङकारणकारञकारवर्जितेषुस्वामिनः क्रमेणास्युर्यथाकछडधभवानांअ- कारः खजढनमशानामिकारः गझतपयषानामुकारः घटथफरसानामेकारः चठदवलहानामोकारः नेच अइउएओएतेपंचस्वराःपक्षद्वय संबंधिनंदाभद्राजयारिक्तापूर्णानांतिथीनांक्रमात्स्वामिनः तत्रापिप्रतितिथिकपि ११लवतः एकादशांशप्रमाणेनैकैकस्वरभोगः तत स्त्वेकस्यांतिथावेकैकस्यस्वरस्यभोगघटी ५पल २७ प्राण २ गुर्वक्षरोच्चार ७ एवमहोरात्रव्यापिन्यांषष्टिघट्यात्मिकायांनंदायांप्रातरारभ्यपं-

पंचाणोङःस्वराःकछडधभवमुखेष्वङ्ण ञव्यंजनेषुस्युर्नंदादेस्तिथेस्तेतिथिकपि११ लवतोप्यंतराभोगभाजः॥ नाम्नोबालः कुमारोयुवसजरमृतास्त्वादिवर्गस्वरास्तेसिद्ध्युत्कर्षेपुवांतोपचयइतरयोर्युध्यतांद्विण्मृताचि॥ १० ॥ चादिघट्यादिका

लेअकारस्वरभोगः तदनुतावत्स्येवकालेइकारस्यतथैवउए ओएतेषांतावतितावतिकालेभोगः एवंपंचस्वरभोगकालः घटी२७ पले७६ प्राण २ गुर्वक्षरोच्चार ७ ११पुनरकारादिपंचस्वराणांएतावत्स्येवकालेभोगः तेनभुक्तघट्यः ५४ पलानि २२ प्राणं ४ गुर्वक्षरोच्चार ४४ ११पुनरकारभोगः तावत्येवपंचघट्यादिकालेतेनषष्टिघटिका अहोरात्रजाः पूर्यंतेपुनभद्रायांतिथौप्रातरारभ्यइकारस्यभोगः ततःउकारादीनामेवंजयायामुका रादीनांरिक्तायामेकारादीनांपूर्णायामोकारादीनांयस्यस्वरस्ययातिथिस्तस्यतस्यत्रिर्भोगोअन्येषांद्विर्द्विरितिभावः॥ संप्रतिस्वरावस्थामाह नाम्नइति॥ स्यापियाख्यादिनाम्नोःपंचआद्योवर्णस्तत्स्वामीयअकारादिपंचमध्येस्वरःसबालःनद्ग्रिमः कुमारस्तद्ग्रिमोयुवाअग्यो वृद्धःअ ३

ग्प्रो मृतः यथा रामनाम्न आदिवर्णो रेफस्तदीशएकारस्वरो रामचन्द्रस्य बालस्वर आकुमारः अयुवा इकृद्धः उमृतः एवमन्येषां ग्राह्याः स्वरा
दीनामच्युतादिनाम्नां उवर्णाभावादकारादिरेववर्णस्वरोग्राह्यः एतत्फलमाह सिद्धीति॥ बालस्वरभोगकालारब्धकार्यात्कुमारस्वरभोगका
र्येधिकासिद्धिः एवंकुमारकालाद्युवकालसिद्ध्याधिक्यमितियुवस्वरांते सिद्धेरुत्कर्षः इतरयोर्वृद्धमृतयोः स्वरयोः सिद्धेरपकर्षः। इतिस्वयु
वस्वरभोगकालंज्ञात्वाकार्यारंभः एतत्कृत्यमाह॥ द्विषतः शत्रोर्मृतावपिमृतस्वरभोगकालेयुध्यंतायुद्धंक्रियतांस्वयुवस्वरेचतद्राजयइति-
भावः॥ २०॥ अथाकारादीनांग्रहराशीशत्वंतत्तद्राशग्रवुदपंचाह॥ मंगलादित्ययोरेतत्क्षेत्रभूतानांचराशीनां मेषवृश्चिकसिंहानामकारः

भौमेनयोर्ज्ञशशिनोप्युगुरोर्भृगोघ्म्रसेन्त्रे शनेरुद्रयिनोयनवांशकेज्ञात्॥ भारे २४ करे २२ तुपरतोंतिमभादिसप्तस्वादि
त्यतस्त्विदुमुखाअपिपंचकेषु॥ २१॥

स्वामीएषुराशिष्वकारउदितः १ एवंबुधचन्द्रयोस्तद्राशीनांचकन्यामिथुनककीर्णामिका
रः स्वामीएषूदयीच २ एवंबृहस्पतेस्तद्राश्योर्मीनधनुषोश्चउकारः॥ ३॥ एवंशुक्रस्यवृषतुलयोरेकारः ४ शनेर्मकरकुंभयोरोकारः ५ अ-
थनवांशेशत्वमाहाथइति॥ अजान्मेषमारभ्यतेनमेषादिद्वादशराशीनांनवांशकाः १०८ तेषांमध्येमेषवृषयो १८ नवांशकेषुमिथुन
स्याद्यषट् ६ नवांशकेषुचाकारईशः मिथुनांत्यत्रिनवांशकेषुकर्कसिंहयोश्चाष्टादश १८ सुचेकारः २ कन्यातुलयोर्वृश्चिकाद्यत्रये-
चोकारः ३ वृश्चिकान्त्यषट्केधनुषिमकरांत्यषट्केचैकारः ४ मकरांत्यत्रयेकुंभमीनयोश्चौकारः एवंभारे २४ मेषादिचतुर्वि

Indira Gandhi National Centre for the Arts

का॰ खं॰ ४

शतिनवांशकानां अकार ईशः परतस्तद्धिमेषु करे एकविंशत्ते ॥ २११ ॥ कविंशतिसंख्यानां नवांशानां इकाराद्याः क्रमात्स्युः अथ नक्षत्रेशत्वमाह ॥ अंतिमेति ॥ अंतिमं भं रेवती तदादि सप्तसार्द्धांतिषु नक्षत्रेषु अकारः प्रभुः आदितः पुनर्वसुः तत आरभ्य पंचसु पंचसु इ उ ए ओ सुखाः ॥ इकारोकाराद्याः स्वराः ईशा एवं सप्तविंशतिभानां पंचस्वरा ईशाः ॥ ११ ॥ अथ संवत्सरेशत्वं पंचानामाह ॥ रूपा १२ब्धा द्वादशवर्षेषु प्रभवादि वृद्धधान्यांतेषु संवत्सरेष्वकार ईशः प्रमाथ्यादि द्वादशाब्देषु इकारः खरादिषूकारः शोभनादिष्वेकारः राक्षसादिष्वोकारः कृत्तीशमाह हायनेति ॥ हायनः संवत्सरः तस्य तैवः षड्वसंताद्यास्तेषु ते अकाराद्यः ईशाः षड्तुदिनानि सौरमानेन पंचशाक्ष्युत्तरत्रिशतीतद्विभागस्तु मासौ २

रूपा १२ब्धा मथ हायनर्तुषु चते तत्काय ११भागांतराद्भुक्त्या वाच्यवरे यने त्वइ रिमौ कृष्णान्ययोः पक्षयोः ॥ राधे भाद्रपदे सह स्य इ रिषाषाढेन मस्युर्मधौ पौषे थैरपि शुक्र ऊर्जउदपीमाघांत्ययोरोस्तथा ॥ १२ ॥

दिनय॰ एकैकस्य भुक्तिरेवं षड्तवो भुक्ताः स्युद्वीदशवार्षिकभोगे ऋतुभोगे वा अवांतरभोगमाह तत्कायेति ११ तेषां रूपाब्दानामृतूनां च काये ११ भागे लब्धकाल एकैकस्वरावांतरभोगेनावांतरभुक्त्या भुक्तमित्यर्थः ॥ द्वादशाब्दविभागो यथा वर्ष १ मास १२ घटी ४३ पल ३८ प्राण १ गुर्वक्षरोच्चार १ इति ऋतुभोगदिनेषु ७३ एष्वेकादशांशो-वांतरभोगः विभागस्तु दिन ६११ घटी ४३ पल ३८ इति प्रतिस्वरभोगकालः ॥ अथायनेशत्वमाह ॥ अवाचीति अवाचि दक्षिणायने अव रे उत्तरा-यणे एतयोर्द्वयोरयनयोरकारेकारावीशौ नापरेस्वराः पक्षेशत्वमाह ॥ इमाविति इमौ अकारेकारौ कृष्णान्ययोः कृष्णशुक्लपक्षयोरीशौ मासे-शत्वमाह ॥ राध इति राधो वैशाखः तस्मिन् भाद्रपदे सहा मार्गशीर्षस्तस्मिं श्चाकारः प्रभुः इ इकारः इषे आश्विने आषाढेन भसि श्रावणे च प्र

Indira Gandhi National Centre for the Arts

षु:उ:उकार:मघौचैत्रेपौषेचेशाए:एकार:शुक्रेज्येष्टेऊर्जेकार्त्तिकेचेश: माघांत्ययो: माघ: प्रसिद्ध: अंत्य: फाल्गुन: तयो: ओकार: स्वामीअ-
वांतरभीगइहापिशाग्वत्ज्ञेय:॥एतावतावर्णस्वर: प्रपंचित:॥ इतिवर्णस्वरचक्रं॥ अथमात्रास्वराद्याह॥ नाममुखंनाम्नआरंभ: तत्रयो-
र्णोविवर्ण: तद्गतायास्वरमात्रासमात्रा स्वर:सचासावच्चतरच्चमात्राजित्यर्थ:।सचमंत्रादिसाधनकर्मस्वनूकूलोग्राह्य:॥जीवस्वरमाह॥ह
लजितिनाम्नोयेहल्वा: अचश्चतेषांयेवक्ष्यमाणावर्गीयेसयासंख्येतयोरैक्यजीवस्वरोभवतिसचशुभेमंगल
कृतेग्राह्य: पंचाधिकाचेत्संख्यातदापंच५भिर्भागोऽनुपदिष्टोपिकार्य:भागेय: शिष्टांकस्तत्संख्याएवाकारादि

मात्रानाममुखार्णजैवतुतदज्मंत्रादिसिद्धौहलच्च संख्यैक्यंतप१६संख्ययाशुभि५यशो:काद्योमि५
जीवाच्छुभे॥ पिंडाज्मात्रिकवार्णिकैक्यम५हृते शेषश्चमूसत्कृतौ॥ पंचसुस्वरोग्राह्य: शून्यशेषेतुपं
चम:ओकारएवग्राह्य:अस्यचजीवस्वरसंख्याकिंस्थानस्थेषुवर्गेषुस्यादित्यपेक्षायामाह तपइति अमुस्वरेषुत
पसंख्यया षोडशसंख्ययाव्यवच्छिन्नेषु अआइईउऊऋॠऌॡएऐओऔअंअ:।इतियशो:यवर्गशवर्गयोर्भि:
चतु:संख्ययो: सतोरित्यर्थ:।कादेकवर्गादेवर्गजालेकचटतपरूपेमि५मिति:प्रत्येकंपंचाक्षरमितिरित्यर्थ:।वि
शेषायजीवस्वरचक्रमेवलिख्यते यथाअत्रोदाहरणं॥रामनाम्न: रेफाकारमकाराकाररूपत्वात् द्विद्विपंचैकसंख्ये
क्यं १०पंचभागेशिष्टंशून्यंतेनरामचन्द्रस्योकारएवजीवस्वर:पिंडस्वरमाह।पिंडेतिमात्रिकोमात्रास्वर:वार्णिको

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अ | आ | इ | ई | उ | ऊ | ऋ | ॠ |
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ |
| ऌ | ॡ | ए | ऐ | ओ | औ | अं | अः |
| ९ | १० | ११ | १२ | १३ | १४ | १५ | १६ |
| क | ख | ग | घ | ङ | च | छ | ज |
| १ | २ | ३ | ४ | ५ | १ | २ | ३ |
| ४ | ५ | १ | २ | ३ | ४ | ५ | १ |
| झ | ञ | ट | ठ | ड | ढ | ण | त |
| २ | ३ | ४ | ५ | १ | २ | ३ | ४ |
| थ | द | ध | न | प | फ | ब | भ |
| म | य | र | ल | व | श | ष | सह |
| ५ | १ | २ | ३ | ४ | १ | २ | ३४ |

वर्णस्वरः तत्संख्ययोरैक्यं मह्रते पंचहृते यः शेषः सपिंडाख्यपिंडस्वरो भवतीति संबंधः। सचम्वाः सेनायाः सत्कृतौ सत्कारे सज्जीकरणे ग्राह्यः उ-
दाहरणं यथा रामस्य वर्णस्वर एकारश्चतुर्थत्वात् चतुःसंख्या मात्रास्वरस्त्वकारः प्राथम्यादेकसंख्यः तयोरैक्यं ५ म पंचभागशेषे शून्यं तत ओ
कारस्वर एव श्रीरामस्य पिंडस्वरः। अथ यौगिकस्वरमाह। मात्रेति। मात्रास्वरः वर्णस्वरश्च प्रागुक्त ग्रहस्वरस्तु तन्नामराशीशग्रहसंबंधात्।३।
पिंडस्वरः प्रागुक्तः ४ जीवस्वरश्च ५ भंजन्मनक्षत्रतदधिपस्वरः ६ ग्रहं राशिस्तस्य योऽच् ७ एषां मात्रादिस्वराणां याः संख्याः तासामैक्यं मह्रतं पं
चभिर्भक्तं शिष्टो यौगिकस्वरः यथा रामचन्द्रस्य यौगिकस्वरः साध्यते मात्रास्वरः अकारः प्राथम्यादेकसंख्यः १ वर्णस्वर एकारः चतुःसंख्यः ४ ग्र

मात्रार्णग्रहपिंडजीवभग्रहाजैक्यान्मतद्यौगिकः ॥१३॥ योगाच्चायोगभजनं वर्णाच्चा सर्वमावहेत्॥ विशेषतश्च संग्रा
मं सहि सर्वस्वराग्रणीः ॥१४॥ तेषामचां लयभराय मितिर्हलां च नाम्नोरलां तु मिलिता मह्रता दृथक् सा ॥ ७ ॥

हस्वरस्तु रामनाम्नस्तुलाराशित्वात्तस्येशः शुक्रः तस्य स्वर एकारः ४ पिंडस्वरस्तु प्राग्रीत्या ओकारः ५ जीवस्वर ओकार एव ५ नक्षत्रस्वरोपि अ
वकहडचक्रानुसारात् रामचन्द्रस्य चित्रानक्षत्रत्वात् स्वर उकारः ३ राशिस्तु रामस्य तुला तत्स्वर एकारः ४ एतत्संख्यैक्यं २६ पंचभागे शिष्टं १
अत्र अकारो रामचन्द्रस्य यौगिकस्वरः ॥१३॥ योगवर्णस्वरयोर्विनियोगादिदानीं तयोः कार्यमाह॥ योगाच्चा यौगिकस्वरेण योगभजनं योग- ५
मार्गसेवनं तदुदये तत्काले तद्ध्रुवत्वे कुर्वीतेति भावः वर्णाच्चा वर्णस्वरेण सर्वं कर्म आवहेत् कुर्यात् विशेषतस्तु वर्णस्वरानुकूल्ये संग्रा-
मं कुर्यात् हि यस्मात्सर्वस्वराणामग्रणीः मुख्यः ॥ १४ ॥ अथ भद्रादीनां युद्धादौ जयपराजयसाम्यज्ञानमाह ॥ तेषां अ इ उ ए ओ इति प्रा

Indira Gandhi National Centre for the Arts

शुक्तानांपंचानांस्वराणांतत्संबंधिनांहलांचसंबंधिनीमिति: संख्याल ३प १भ ४रा २य ९ एवंरूपास्यात् तेनअकछडथभवानांल ३ इतित्रिसंख्या ३ खजढनमशानांय इतिएकं १ संख्याउगझतपयषाणांभ इतिः चतुःसंख्या ४ एघटथफरसानां रा इतिद्विसंख्याओचठदवलहानांय एकसंख्या १ भवतिनाम्नोर्यथोर्जयपराजयज्ञानमिष्टं तन्नाम्नोर्येअल इतिप्रत्याहारग्रहणात् स्वरावर्णाश्चतेषांसंबंधिनीयासंख्यालयभरायेत्युक्ताप्रतिस्वंमिलितासतीपृथक्मैः पंचभिर्हृताचयास्यात् ॥ सदाविजयमाह। अधिकनामसंख्यस्यसासंख्येत

| | | | | |
|---|---|---|---|---|
| ल | यं | भं | रां | यं |
| ३ | १ | ४ | २ | १ |
| अ | इ | उ | ए | ओ |
| क | ख | ग | घ | च |
| छ | ज | झ | ट | ठ |
| ड | ढ | त | थ | द |
| ध | न | प | फ | ब |
| भ | म | य | र | ल |
| व | श | ष | स | ह |
| ० | ० | ० | ० | ० |

हीनामृतिविजयमाहतथाधिकासातुल्यासमंचसमरंयदिवापिसंधिम् ॥ १५ ॥ स्त्री-
दिदिस्वंतरगास्तुतेचः सुखंजयेद्यूनिजयस्तुघातात् ॥

रेतरंतुल्यासमाचेत्तदातुल्यंसमंसंग्राममाह। यदिवापक्षांतरेसंबंधिद्वयोः राज्ञोः संधिमाह अत्रवर्णसंख्याग्रहणेननिषिद्धवर्णानांङ.कारणकारादीनांनाम्निसंभवेसंबंधेवाशून्यमेवग्राह्यं नकदाचित्संख्याउद्दिष्टवर्णाभावात् ॥उदाहरणं॥यथारामसंख्या ९रा ५व ६णकारस्याभावाच्छून्यतरकारस्य ३ एवंरावणनामसंख्या १४ यासाउभयत्रपंचभागेशेषौ ४।४ अत्रयुद्धेसंधिर्वाच्या ॥ १५॥ इतिश्रीभरतकृतसमरसारटीकायांस्वरभेदोयुद्धकालेजयपराजयौच॥अथबालकुमारादि

स्वरवशाद्बलमाह॥ तेअकारादयोऽत्र स्वराः पूर्वादिदिक्षु मध्येच भागेसमायायुद्धस्थानादेश्चसन्निविष्टाज्ञा तव्याः तत्रपूर्वोनियुवस्वरविषयेजयेत निजयुवस्वरदिशमाश्रितोभटःसुखंजयेत इतितात्पर्यार्थः आद्ययोस्तु वालकुमारयोर्यातादनंतरंयातेभ्रहोरेलग्नेसतिजयःपर्यंततःस्यादित्यर्थः अंतिमयोर्वृद्धमृतयोनस्यात् स्वश त्रुबलाबलाभ्यांस्वंयुवस्वरदिशांशत्रुंमृतस्वरदिशंप्राप्तंकृत्वा इत्यस्यस्वरबलेशत्रोस्तुबलाभावेयुद्धवांदाद्य र्यतांदिशमाददीत तत्रस्थित्वायुद्धादिकुर्यात् उदाहरणं अत्ररामरावणयोरेकारस्वरोबालस्तद्दिक्चउत्त- स्यादाद्ययोर्नांतिमयोःस्वशत्रुबलाबलाभ्यांबलमाददीत॥ १६॥ऐशानीतः सितकुजशनिरविग्रहराशयः प्रतीचीन्दोः॥गुरुग्रहयोरस्तउदग्दिशोज्ञग्रहयोस्तु वायव्यां॥१७॥ राअतस्तयोः प्राच्यांयुवस्वरस्तद्दिशिरामरावणयोर्बलं। इतिभूबलज्ञानं ॥१८॥अथरविचन्द्रहर्निविवक्षुस्तत्तद्ग्रहराशीनांदिग्विशेषेनिवेशमाह॥ऐशानीं दिश मारभ्यप्राच्यादिदिक्क्रमेण अग्निमाविवक्षिताः तासुशुक्रादिग्रहभूताराशयोनिविष्टा ज्ञेयाः यथशुक्रराशीवृषतुलेतोईशान्याम्॥मंगलस्यराशीमेषवृश्चिकौतौप्राच्यांशाने मकरकुंभौआग्नेय्यांरविग्रहंसिंहःसदक्षिणस्यां इंदोर्गृहंकर्कः प्रतीच्यांगुरुग्रहेधनुर्मी

| | | |
|---|---|---|
| इ॰ शु<br>वृ॰ तु॰ | पू॰ भौ॰<br>मे॰ वृ॰ | अ॰ श॰<br>म॰ कुं॰ |
| उ॰ गु॰<br>मी॰ | | द॰ सू॰<br>सिं॰ |
| वा॰ बु॰<br>मि॰ क॰ | प॰ चं<br>कर्क | रा॰ नै<br>ध॰ |

| | | |
|---|---|---|
| शुक्रग्रहं<br>ईशान<br>तुलावृषौ | भौमग्रहं<br>पूर्व<br>मेषवृश्चिके | शनिग्रहं<br>अग्नि<br>मकरकुंभौ |
| जीवग्रहं<br>उत्तर<br>मीनः | ग्रहराशि<br>चक्रम् | रविग्रहं<br>दक्षिण<br>सिंहः |
| बुधग्रहं<br>वायव्य<br>कन्यामिथुने | चन्द्रग्रहं<br>पश्चिम<br>कर्क | जीवग्रहं<br>नैर्ऋतिः<br>धनुः |

| | | |
|---|---|---|
| | पू<br>अ | |
| उए | मध्ये<br>ओ | द॰इ |
| | प॰<br>उ | |

नोतयोरस्तोदिङ्नैर्ऋतीउदीचीचदिङ्क्रमेणज्ञेयाज्ञोबुधस्तस्यगृहेकन्यामिथुनेतयोर्वायव्यां ॥१७॥ अथैतादिशएतेराशयश्चप्रथमादिप्रहरेषुत्याज्याः यथाइतिचक्रम् ॥ अथरविहतांदिशमाह ॥ अर्कः सूर्योदिनेद्वितीययामार्द्धतः द्वितीयश्चासौयामार्द्धश्चेतिद्वितीययामार्द्धतः प्रथमाति-

| | | |
|---|---|---|
| | सू·पु·३<br>४अआ<br>४ ४ | |
| उ·सू·रे<br>२अंआ<br>४ ४ | रविच-<br>क्रम् | द·सू·३<br>२ १ ५<br>आ अं<br>४ ४ |
| | प·सू१<br>२अंआ<br>४ ४ | |

क्रमेकारणाभावात प्रथमयामस्यार्द्धतदारभ्यप्रथमयामस्यद्वितीययामार्द्धमारभ्यतेत्यर्थः॥ यामेयामेप्रहरेप्रहरेतृतीयांतृतीयांदिशंहंतिकांदिशमारभ्येत्यपेक्षायांचाह प्रतीचीप्रभृतीतिसर्वदिगपेक्षयाबहुलंनेनप्रथमद्वितीययामयोरंत्याद्याभ्यांप्रतीचींद्वितीयतृतीयांत्याद्याभ्यांउदीचींतृतीयचतुर्थांत्या-द्वितीययामार्द्धतयेवयामेयामेतृतीयांचततस्तृतीयां ॥ अर्कः प्रतीचीप्रभृतिंनिहंतिप्रागंत्ययामार्द्धयुगेनयाम्यां ॥ १८ ॥ ईशाद्विदिशगंचंद्रोयामेयामेनिहंतिवृषकुंभौ ॥ द्याभ्यांयाम्यांहंतीतिभावः एवंरविदग्धादिशस्तात्कालेशुभकर्मसुत्याज्याः ॥ १९ ॥ अथचन्द्रहताविदिग्दिशस्तद्राशींश्चाह ॥ चंद्रईशाद्विदिशांईशानादिविदिशगंसंबंधिनौराशीदिनेयामेयामेप्रहरमात्रेकालेनिहंतिकौतावित्याह वृषकुंभौईशानाग्नीस्थौप्रथमप्रहरेहंतिमृगोमकरस्तंचाग्नेयीस्थं ॥

| | | |
|---|---|---|
| ईशानी<br>वृ·चं·कुं<br>१ यामे | | चं·मि·म<br>सि<br>२ यामे |
| | चन्द्रहत<br>राशिज्ञाना<br>र्थं चक्रं | |
| वा· चं·<br>मि· कुं<br>४ यामे | | नै·चं·<br>धनु·<br>३ यामे |

Indira Gandhi National Centre for the Arts

सिंहंचदक्षिणदिक्स्थंद्वितीययामेनिहंतिधन्विधनुः नैर्ऋतिदिक्स्थंतृतीययामेनिहंतिकन्यामिथुनेवायव्यदिक्स्थेतुर्ययामेहंति एवंशेशा
नीतः क्रमेणविदिशोदक्षिणाद्यदिक्तत्रस्थिताराशयोचंद्रमसाप्रथमप्रहरमारभ्ययामचतुष्टयेहताःस्युः अतएतादिशस्तेराशयश्चप्रथमा
दिप्रहरेषुत्याज्याः॥१९॥ इतिचंद्राहतराशयोविदिशश्चेति॥अथगूढापराख्यकेतुहतदिग्विदिशआह॥गूढानामाग्रहभेदोऽर्द्धप्रहरैःषोड
शसंख्यैर्दिनरात्रिसंबंधिभिराग्नेयींदिशमारभ्यषष्ठींषष्ठींदिशंप्रहरार्द्धांशेनदिनेरात्रौचहन्यात्।ततश्चद्युनिशोर्वा

| | | |
|---|---|---|
| | स्था·पू सू·पूर | |
| उ·सू· ३ द· स्था· | | सू· द·दपि या |
| | या पू·सू· पू पि· | |

| | | |
|---|---|---|
| | पू·चं· अ· स्था·३ | |
| उ·वा स्था·पि च· | | द·चं·वा ३·या |
| | प·अ·३ चं·या | |

हयेनैकैकादिक्हताभवति अतोगूढहतदिक्सन्मुखेनतद्दिक्स्थरिपूपरि
मृगसिंहौधन्वितथाकन्यामिथुनेक्रमेणैव॥१९॥गूढाख्योऽर्द्धप्रह
रैराग्नेयीतस्तथादिवानिशिच॥षष्ठींषष्ठींहन्यात्तत्सुखयात्राशुभान
रणे॥२०॥दृष्टेर्कोयदिदक्षिणेपिपुरतःछायाथवामेजयः किन्त्वर्कोवह
तीहयायिनिविधौवाहस्थितेस्थायिनि॥ यात्रेवशुभानतुतस्यांदिशिस्थित्वारणःकार्यःअहि

| | | |
|---|---|---|
| ई·७ राहुः ४ | पू·४ राहुः ४ | अ·१ राहुः ४ |
| उ·२ राहुः ४ | राहुच- क्रम् | द·६ राहुः ४ |
| वा·५ राहुः ४ | प·८ राहुः ४ | नै·३ राहुः ४ |



तत्वात् दिक्क्रमसंकेतस्तुआउनैघ्रवादईपइतिदर्शितं एतादिशोविदिशश्चदिवानिशंवर्ज्याः॥२०॥ इतिगूढं॥ अथरविचन्द्रयोःदृष्टदक्षिणादि
शिस्थितौसत्यांयायिस्थायिनोर्जयपराजयावाह॥ यायिनःस्थायिनोपि अर्कोयदिदिनेदृष्टप्रदेशेदक्षिणप्रदेशेवास्यात्तदाछायापुरतःस्वाग्र
प्रदेशेवामप्रदेशेवाचेत्तदाचयायिस्थायिनोर्जयः किंत्वयंविशेषः अर्केवहतिदक्षिणभागस्थपिंगलाख्यरविन्यांप्राणवायौवहत्यर्केचदृष्टदक्ष

स्थेयायिनिजयोनस्थायिनिदृष्टदक्षस्थे अर्केविधौचन्द्रमसिवाहस्थेवहतिवामभागस्थेडाख्यचन्द्रनाड्यांप्राणवायौवहतिस्थायिनिजयः नि-
शिरात्रौतुशशीचन्द्रोनिजवामेयतोवाचेत्तदाछायास्वदृष्टप्रवेशेस्वदक्षप्रवेशेचगच्छतितदायायिस्थायिनोर्जयोयंतुविशेषः वामायतेचन्द्रेचं
न्द्रनाडीवहेचयायिनोजयः नस्थायिनः परस्यस्थायिनस्तुवामाग्रगेचन्द्रमसिसूर्यनाडीवहेसजयः नयायिनः क्षयीक्षयपक्षेकृष्णपक्षेगतः शशी
चंद्रोवामएवेष्टः ॥२१॥ अथप्रागुदीच्यादिदिगवस्थितार्कचंद्रवशात्स्थायियायिनोर्जयपराजयावाह स्पष्टार्थः उदागमनंतूत्तरायणग

| | | |
|---|---|---|
| | प्राची चन्द्र | |
| उदीची चं. स्थायी | प्राच्यादिगतचन्द्रचक्रमिति | दक्षिणा चंद्रः |
| | प्रतीची चंद्रः | |

| | | |
|---|---|---|
| | पू. वायुः | |
| उ. वायुः | वायुचक्रमिति | द. वायुः |
| | प. वायुः | |

छायादृष्टगदक्षिणानिशिशशीवामेयतोवाजयो यातश्चंद्रवहेपरस्यतुरवेर्वामः
शशीष्टः क्षयी ॥२१॥ प्राचीमुदीचींवाचंद्रेगतेस्थायीजयीभवेत् ॥ प्रतीचींदक्षिणां
प्राप्तेयायीविजयमाप्नुयात् ॥ २२ ॥ वायुः पृष्ठेदक्षिणेचवहन्सूचयतेबलं ॥ सम्मुखी
नश्चवामश्चभटानांभंगसूचकः ॥ २३ ॥
तस्यचंद्रमसः स्वमध्यान्हेस्वाद्धीडित्त
रतोगतिः संभवतीति इतिरवीन्दुगूढछायाबलानि ॥ अथवायुबलमाह पृष्ठेदक्षेचवहन्वायुः बलंसूचयति यथाप्राङ्मुखस्यपाश्चा
त्योदाक्षिणात्योवायुर्बलसूचकः सम्मुखीनः सम्मुखेवहन् वामश्चभटानांभंगंपराजयंसूचयति ॥ इतिवायुबलम् ॥

अथराहुबलमाह॥ अगुः राहुः यामार्द्धैः प्राग्वातांतकशिवप्रत्यक् वन्हिउत्तरनैर्ऋतिदिशः एतिक्रयमित्यपेक्षतेषष्टींषष्टीमितिप्राच्यादि दिशोगच्छन्षष्टीषष्टीदिशंयाति नवुक्रमेणसचराहुः अर्कवत्पृष्ठेदक्षेचहितःबलदःअयंभावः राहुः प्रातरारभ्ययामार्द्धंप्राच्यांतिष्ठतितद नुषष्टीदिशांवायव्यातस्यांयामार्द्धंतिष्ठतिततःषष्टीदिग्दक्षिणातस्यांयामार्द्धंततईशदिशिएवंक्रमेणषष्टींषष्टींदिशंयामार्द्धयामार्द्धंया- तिसचसकलकार्येषुपृष्ठस्थोदक्षिणभागस्थः शुभः अन्यत्राशुभः एवंदिवाराहुश्चारउक्तःनिशितुपाशिककुभः पश्चिमदिशआरभ्य

| राहोर्दिनवारचक्रम् | | |
|---|---|---|
| ई॰ रा॰४ ४ | पू॰ रा॰१ ४ | अ॰ रा॰६ ४ |
| उ॰७ रा४ | राहुचक्रं | द॰रा३ ४ |
| वा॰रा२ ९ | प॰रा४ ५ | नै॰रा८ ४ ३ |

| राहोःरात्रिवारचक्रं | | |
|---|---|---|
| ई॰रा४ ८ | पू॰ रा॰४ ५ | अ॰ रा॰२ ४ |
| उ॰रा॰४ ४ | राहुचक्रं | द॰ रा७ ४ |
| वा॰रा॰ ६ ४ | प॰रा १ ४ | नै॰रा॰ ५ ४ |

प्राग्वातांतकशंभुपाशिहुतभुक्पौलस्त्यरक्षोदिशो
यामार्द्धैरगुरन्हिपाशिककुभोसौषष्ठिषष्टींनिशि॥पृ
ष्ठेदक्षिणतःशुभोद्विघटिकोसौतुर्यतुर्यांव्रजन्नीशावाक्य
वनेंद्रराक्षसहिमग्वग्निप्रतीचीर्दिशः॥२४॥प्राक्तोमानल
रक्षोवाक्पाशीवायवेशादिक्षुदर्शान्तेः॥ ७ ॥

| | | |
|---|---|---|
| ई॰ रा॰१ | पू॰ रा॰४ | अ॰ रा॰७ |
| उ॰ रा॰६ | मुहूर्त राहुः | द॰ रा॰२ |
| वा॰ रा॰३ | प॰ रा॰८ | नै॰ रा॰५ |

| | | |
|---|---|---|
| ई॰ महालक्ष्मी ८।१६ | पू॰ ब्राह्मी १।९ | अ॰ कौमारी ३।११ |
| उ॰ माहेश्वरी २।१० | योगिनी चक्रम् | द॰ वाराही ५।१३ |
| वा॰ चण्डिका ७।१५ | प॰ ऐंद्री ६।१४ | नै॰ वैष्णवी ४।१२ |

षष्टींषष्टींप्रहरार्द्धैरेतितेनैवपूर्वोदयः पश्चिमाग्नेयोत्तरनैर्ऋत्यपूर्ववायव्यदक्षिणेशादिशिइत्यर्थः॥ अथद्विघटिकोमुहूर्त्तिकोराहुः प्रातरा रभ्येशानीतुर्यचतुर्थदिशंमुहूर्तेमुहूर्तेयातिदिनरात्रौद्वात्रिंशन्मुहूर्त्तौअष्टदिशांचत्वारोभ्रमास्तत्रक्रमःऐशानदक्षिणवायव्यपूर्वनैर्ऋतो त्तराग्नेयपश्चिमासुक्रमेणन्यासत्रयं॥२४॥ इतिराहुबलकथनं॥अथयोगिनीबलमाह॥योगिनीप्रागुदग्वन्हीत्याद्युक्तक्रमेणदिक्षुदर्शांतैः

Indira Gandhi National Centre for the Arts

प्रदिपदादिअमावास्यापर्यंतैस्तिथिभिः तिथिदलजदर्शांततिथ्यर्द्धयामार्द्धं दर्शोऽमावास्यास्तदंतायास्तिथयस्तासां यद्दर्द्धं पूर्वं एतदतिक्रमेकारणाभा
वात्तस्मिन्नेयामार्द्धेअर्द्धप्रहराअष्टसंख्यास्तैःक्रमेतेति संबंधः एवं द्वितीयार्द्धेपितिथीनां रात्रौयोगिनीप्रागुक्तदिक्क्रमेणेतिसाचार्कवत्स्पष्टेदक्षिणे
चशुभफलदाअपंभावः प्रतिपत्सप्तम्यां नवम्यांक्रमशः कृष्णतिथिषु प्रागुदग्नेयनैर्ऋतिदक्षिणपश्चिमवायव्येशानीषुयोगिनीचरतिएवंनवम्यादिपूर्णिमां
तासुसप्ततिथिषुवायव्यपर्यंतंदर्शेच ईशानदिश्येवयोगिनीयातिप्रथमअत्रैवंव्याख्येयंदर्शांतैः षोडशभिस्तिथिभिः अतः सप्तम्यां पौर्णिमास्यांचवा
यव्येयोगिनीटीकाकृद्भिः यतदर्शेवायव्ये योगिनीत्युक्तं तन्नरपतिमतमालोक्यलिखितं प्रथमसप्तमचतुर्थतृतीयाष्टतृतीयद्वितीयतृतीयादिशा इत्य

तिथिभिस्तिथिदलतोर्द्धप्रहरैरिनवत्तु योगिनी शस्ता ॥२५॥ ब्राह्मी कौमारी वाराही वैष्णव्यथैन्द्रीच ॥ स्याच्चण्डिकाचमाहे
श्वरीमहालक्ष्म्यभिख्याच ॥ २६॥ पृष्ठेदक्षेयोगिनीराहुयुक्तायस्यैकोयंशत्रुलक्षंनिहंति ॥ श्रेष्ठंसर्वेभ्योवलेभ्यस्तदेवसं-
क्षेपोयंसर्वसारोप्यथापि ॥ २७॥ पूर्वः किंस ७ भ ४ ल ३ द ८ ले ३ रा २ ग ३ इतिदिक्संकेतः यामार्द्धयोगिन्यपि यत्तिथौ यत्रदिशिवर्तते ततआर
भ्यशानवादियामार्द्धैः किंस ३ भ ४ ल ३ इ ८ ले ३ रा २ ग ३ इतियातिएवंनिशिन्यासचक्रम् ॥ २५॥ एताः क्रमात्प्रतिपदातिथियोगिन्यः यामार्द्धयोगिन्यो
पितिथियोगिनीमारभ्यप्रथमंसप्तमचतुर्थतृतीयाष्टमतृतीयद्वितीयतृतीयाः किंसभलदलेरागइतिसंकेतिताज्ञेयाः ॥२६॥ इतियोगिनीवलक-
थनं ॥ अथराहुयुक्तयोगिनीवलप्रशंसामाह ॥ यस्यपृष्ठेराहुयुक्तायोगिनीपृष्ठेदक्षेचस्यात् एकोयंशत्रुलक्षंतद्बलमाहात्म्यान्निहंति तदेतद्राहुयो
गिनीवलं ॥ सर्वेभ्योवलेभ्योदिक्कालवायवादिभ्यः श्रेष्ठंभवति इतिमयासर्वग्रंथभूतः संक्षेपोऽप्ययथाप्युक्तः ॥ इतिश्रीभरतकृतटीकायांराहुयो

अथरव्यादिवारेषुयुद्धेवर्ज्यान्कालार्द्धप्रहरानाह॥ सूर्यादिवाराः सूर्यादिनानितद्गतोयोर्द्धलांतकाभसषिअष्ट८ त्रि३षडे६ क१ चतुः४ सप्त७ द्वि२ संख्येस्त

| | | | | | | |
|---|---|---|---|---|---|---|
| ह | ल | न | क | भ | स | ख |
| सू | चं | मं | बु | बृ | शु | श |
| ८ | ३ | ६ | १ | ४ | ७ | २ |

द्वारयामार्द्धैर्लक्षितःकालः सयुद्धसमयेवर्जनीयः रव्यादिवारेष्वेववर्जनीयानिकर्मांतरेषुप्रहरांनरान्याह भासेति चतुः सप्तद्विपंचाष्टत्रिषड्संख्यानिरव्यादिवारक्रमात्प्रहरदलानिस्वहितार्थंकर्मांतरेष्वपिउज्झेत् त्यजेत् इतिवर्ज्यकालवारार्द्धप्रहरकथनं अथवारविशेषेऽर्धयामभोगशान्याक्रांततत्तदिग्वर्ज्यमाह॥ वारेशांरव्यादिप्राच्यांनिवेर्द्द्लोंतेकोभिसेंखिंयामदलेसुकालः सूर्यादिवासरगतोयुधिवर्जनीयः॥ भाँसाँरेमेंदंलेंतियामदलानिभानुवारक्रमादपिनरः स्वहितार्थमुज्झेत्॥२८॥ वारेशमेष्वांविनिवेश्यपश्येत्प्रदक्षिणस्यानगतात्क्रमेण॥यामार्द्धभागाच्छनिरस्तियस्यांयदानयायात्ककुभंतदातां॥२९॥ वारारंभाद्धुदयःस्वप्रा

| | | |
|---|---|---|
| ई<br>रा·४ | ध्रू·<br>सू·४ | अ·<br>चं ४ |
| उ·<br>श·४ | शनिदिक्कुम्भानार्थ चक्रं | मं·४<br>द |
| वा·<br>शु·४ | प<br>बृ·४ | नै<br>बु·४ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भ | सा | र | म | द | ल | ति | ० |
| ४ | ७ | २ | ५ | ८ | ३ | ६ | ० |
| सू | चं | मं | बु | बृ | शु | श | ० |

अन्यकार्येष्ववर्जनीयाअंकाः ॥

मासाश्ववारपाद्धोरा॥रविसितबुधेन्दुशनिगुरुभौमानामरिखगस्यसावर्ज्या ३० श्यतत्क्रमेणप्रदक्षिणगतान् आग्नेयादिदिग्गतान् चन्द्रादिवारान् प्रहरार्द्धभागांश्चविन्यस्ययदायस्मिन्नर्द्धप्रहरेयस्यांदिशिशनिः स्यात्॥ तदातस्मिन्कालेतांककुभंदिशंसन्मुखतयानयायात् २९ इतिकालः॥ अथयुद्धेवर्ज्यांकालहोरामाह॥वारारंभोवारप्रवृत्तिस्तस्याअनंतरायायदिकादृष्टकालेनाद्घिप्राः

पंचभिरासन्नक्रमेणतस्मिन्नहनियोवाराधिपस्तमारभ्यहोराभवति॥ग्रहक्रमस्तुरविशुक्रबुधचन्द्रशनिगुरुभौमाइतिएतद्ग्रहसंबंधिन्यःक्रमाद्धोराभवंति इष्टकालभवासाचस्वशत्रुराशेर्यईशोग्रहस्तत्संबंधिनीचेत्तर्हिपरित्याज्याइतिहोरावलं॥३०॥अथविरुद्धयामगूढराहुरव्यादिषुयुद्धाचरणेप्रहारस्थलान्याह॥ विरुद्धयामाईयुद्धाचरणेवामांसेप्रहारः विरुद्धगूढप्रहारः प्राग्भागेशरीरस्यऊर्ध्वभागइत्यर्थः विरुद्धराहुभवस्तुकुचापरेविरुद्धरवेस्तुसंबंधीप्रहारः कर्णयोःशिरसिहस्तयोश्चस्यात् विरुद्धचन्द्रात्प्रहारःमुखेभुजद्वयेचस्यात् शत्रुग्रहहोरायांयुद्धारंभेघातःप्रहारोमुखेहृदयेचस्यात् एषुस्थलेषुप्रहारः खड्गादियुद्धेध्रुवं निश्चितंज्ञेयाः विरुद्धयामादयस्तुप्राग्व्याख्याताः॥ ३१अथग्रहस्थित्याप्रहारस्थलान्याह॥

वामांसेत्रविरुद्धयामदलजःप्राग्भागकेगूढजो राहोःस्यात्तुकुचापरेश्रुतिशिरोहस्तेप्रहारोरवेः॥चन्द्रादास्यभुजद्वये प्रहरणंशत्रुग्रहस्यापितुस्याद्धातःकिलहोरयाहृदिमुखेखड्गादियुद्धेध्रुवं॥३१॥लग्नाद्वाशशिनःपुंसःकरिपुकपिनया १० धो ९ द ८ भा ४ मा ५ तद् संस्थाः।खेटाहन्तुर्नवापिद्विषमथसहसामूर्ध्नि वक्त्रेसहृत्के॥हृदयसहितेवक्त्रे॥३२॥वक्षोजे चोरुदेशेगुदइतितदनुग्रंथिदोर्गण्डभागे।वास्तुःसूनुःसकालःखलसमनिशगःकर्णकंठेभुजेच॥ पुंसोभटस्यलग्नाज्जन्मलग्नात् जन्मराशेर्वाएकद्वादशेकादशदशनवाष्टचतुःपंचषट्एषुस्थलेषुस्थितानवापिखेटाः रव्यादयःग्रहाःसहसाऽतर्कितमेवद्विषंशत्रुंक्रमान्मूर्ध्नि १ वक्त्रे २ हृदयसहिते वक्त्रे ३ स्तनस्थले ४ ऊरुदेशे ५ गुदे ६ ग्रंथिप्रदेशे ७ भुजयोः ८ गंडस्थले ९ एषुस्थलेषुहन्तुः निजजन्मलग्नेजन्मराशौस्थितोवाकोमूर्ध्निहन्यात् जन्मलग्नाज्जन्मराशेर्वाद्वादशस्थश्चंद्रोवक्त्रेशत्रुंहन्यादित्यादियोज्यंवास्तुस्तुयस्मिल्लग्नेग्रहमारंभकृतःतस्यपोधीशो

Indira Gandhi National Centre for the Arts




ग्रहः सवास्तुशब्दवाच्यः ज्येष्ठपुत्रोत्पत्तिलग्ने शास्तुग्रहः सूनुनामा स्वजन्मलग्नादष्टमराशीशास्तु कालनामा एतेच जन्मलग्नाज्जन्मराशेर्वा क्रमाद्धित्रिसप्तमस्थानेषु अनिशमनविरतंस्थिताः क्रमात्कर्णकपद्गहस्तेषु शत्रुं घ्नंतीत्यर्थः ॥ इतिभरतकृतसमरसारटीकायां ग्रहारलक्षणम् ॥ अथयुद्धेऽहिचक्रविरुद्धत्याज्यनक्षत्राण्याह ॥ आर्द्रादिभैर्नक्षत्रैर्नाडीत्रयनिर्मिताहिचक्रे यद्येकनाड्यां यस्मिन्दिने जन्मभंनामभंवा सूर्याधिष्ठितभं चन्द्राधिष्ठितभंच त्रीण्यपिस्युस्तदहस्तद्दिनंप्रयत्नेनयुद्धेयत्नात्त्यजेत् ॥ तत्रार्द्रापूफाउफाअनुज्येधनिशतभउभएकनाडीस्थितानिनवभानि ९ पुनर्वसु·मघाह·चि·मू·श्र·पूभा·अश्वि·रोहि·एकनाडीस्थितानिनवभानिशेषानि नवभानि एकनाड्यां अस्मिन्नहिचक्रेनामार्कचन्द्रभानियद्दिनेत्री

आर्द्रादिभैस्त्रिनाड्यामहिचक्रेयद्येकनाड्यांस्युः ॥ नामार्कचन्द्रभानिप्रयत्नेतदहस्त्यजेद्यत्नात् ॥ ३३ ॥ शनिचंद्रौगुरुः सूर्यसितौकुजबुधौत्यजेत् । चतुर्दिक्षुनिषिद्धार्द्धयामेशूलंविशेषतः ॥ ३४ ॥

| | | |
|---|---|---|
| ई | पू श च ६ ७ | अ |
| उ मं बु | दिक्शूल चक्रं | द गु·८ |
| वा | प सू शु ४ ३ | नै |

ण्यपिएकस्यांनाड्यांस्युस्तद्दिनेयुद्धंवर्जयेत ॥ ३३ ॥ इतियुद्धनक्षत्राणि ॥ अथवारदिक्शूलमाह ॥ शनिचंद्राद्यावारेशाः प्राच्यादिचतुर्दिक्षुभासतेत्यादिनाप्राङ्निषिद्धविशेषतः शूलंभवतिसामान्यतस्तुतत्रवारेशादिनंसकलंतत्तद्दिशिदुष्टंतत्रप्राच्यादिदिक्षुदिशियात्रार्थंवर्ज्यम् तत्रैवंयोजनाशनिचंद्रौस्वास्वदिनसंबंधिषष्ठसप्तमप्रहराद्धयोः क्रमाच्छूलं अतस्तौप्राच्यां क्रियासार्द्धयोस्त्याज्योएवमन्येपितत्तद्दिशि तत्तद्यामार्द्धेत्याज्यावाराः गुरुःस्ववारेष्टमयामार्द्धेदक्षिणदिशिशूलंसूर्यशुक्रौस्वस्ववारेदिनेचतुर्थतृतीययामार्द्धयोः प्रतीच्यांशूलंकुजज्ञौस्ववारयोरुदीच्यांद्विपंचार्द्धयामयोः शूलंएतेप्रहरार्द्धाःतत्तद्वारेतद्दिशिविशेषतोवर्ज्याःसामान्यतस्तुतद्दिनानिसकलान्येववर्ज्यानीति ॥ इतिवारदिक्शूलं ॥ ३४ ॥ १०



Indira Gandhi National Centre for the Arts

अथनवग्रहाणांस्वस्वभुज्यमाननक्षत्रेऽश्व्यादिसप्तविंशतिनक्षत्राणामवांतरभोगमाह॥ भस्यनक्षत्रस्यतत्तद्ग्रहभुक्तायानाड्यस्ताधी ९ग्नानवभिर्गुण्यान खाप्तविंशति भागस्तत्रयल्लब्धं भोगपरिशिष्टंचयत॥तयोर्लब्धपरिशेषयोः संबंधिनीगतविद्यमाने शशिनश्चंद्रस्यतात्कालिकेतत्कालभवेगतवर्तमाननक्षत्रेभवतः॥ इत्यमुनैवप्रकारेणरव्याद्याः सूर्यादिभुक्तवर्तमाननक्षत्राणियथास्युरित्यर्थः घटिकातुइहशास्त्रेमतिनुति ६०सूर्यादिभोग्यनक्षत्राणांतत्तद्भोग्यकालषष्ट्यां ६० शः॥३५॥ अथराहुकालानलचक्रमाह वलितावपरीतावक्रागतिर्यस्यताहृशेनराहुणा इनाभुक्तायउडूनांनक्षत्राणां धी९ग्नाभभुक्तनाड्योनरवा२०प्तिपरिशेषयोर्गतःसदपि॥तत्काले शशिभमितिरव्याद्यागतिनुति ६०लवस्कघटिकेह॥३५॥पक्षोजीवोवलितगतिनाराहुणेतोडुलोको १३गम्योस्तुस्तद्युतमुडुशायं१५कर्त्तरीग्रस्तसंज्ञे॥स्थायीनोयाख्युडुपतिरिमौजीवगौतज्ज्ञायाघ्ने ताज्जगधंकिमपिवरंकर्त्तरीजग्धनघ्न॥३६॥ लोकोत्रयोदशजीवःपक्षःराहुभुक्तत्रयोदशभानिजीवपक्षसंज्ञानिस्युरित्यर्थःगम्यस्तुत्रयोदशनक्षत्रात्मकएवपक्षोऽस्तोमृतसंज्ञकः तेनराहुणायुतमुडुनक्षत्रं कर्त्तरीसंज्ञंशायपंचदशं १५तुग्रस्तसंज्ञंस्यात्।स्थायिनः॥सूर्योज्ञेयः यायीउडुपतिश्चंद्रोज्ञयः इमौरवीन्दूजीवपक्षगतौतयोःस्थायियायिनोः क्रमाजयायभवतः धीग्नाभेत्यादिपूर्वश्लोकोकरीत्यानीतयोस्तन्नक्ष

| | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १३ | १४ | जीवपक्षः |
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १३ | |
| अ | भ | कृ | रो | मृ | आ | पु | पु | श्ले | म | पू | उ | ह | भुक्तानि |
| १ उ | २ पू | ३ श | ४ ध | ५ श्र | ६ अ | ७ उ | ८ पू | ९ मू | १० ज्ये | ११ अ. | १२ वि | १३ स्वा | भोग्यानि |
| २८ | २७ | २६ | २५ | २४ | २३ | २२ | २१ | २० | १९ | १८ | १७ | १६ | मृतपक्षः |

त्रस्थितरवीन्द्वोस्तु तत्कालजपपराजयज्ञानंभेतान्मृतनक्षत्राज्जगर्थंग्रस्तंपंचदशांनक्षत्रं किंचिद्दूरंभेष्ठंजग्धाद्भूस्तात्कर्त्तरीसंज्ञंराहुभुज्यमानंभं भ्रेष्ठमित्यर्थः ॥ इतिराहुकालानलचक्रं ॥ ३६ ॥ अथनामनक्षत्रज्ञानायावाकहडचक्रमाह ॥ भुंवीकोष्ठेषुपंचविंशतिसंख्येषुतिर्यक्स्थितोपरिपंक्तौअवकहडइतिपंचाक्षराणिपंचसुकोष्ठेषुउपरितनेषुलिखतदनुअधःस्थितालीषुचतसृषुतद्दावैरेतैः स्वरैः इउएओएवंरूपेश्चतुर्भिर्युक्तांस्तान वकहडपुतान् भेदान् विंशतिसंख्यान् इविकिहिडिइत्येवंप्रकारेणक्रम

भुंवीकोष्ठे२५षुतिर्यक्त्ववकहडउलिखाधःस्थितालीष्विदावैस्तान्युक्तांस्तैःस्वरैश्चक्रमतइहकुयुकुघउ·छौमध्यकोष्ठे॥येयैरूर्ध्वाधरालीषनलभतइहासार्पमर्पौभपादाएवंचान्येषुदद्यान्मठपरतयुयुकुषण्णढामध्यकोष्ठे ॥ ३७ ॥

नोलिखअत्रविशेषः कुयुकुघङ·छौमध्यकोष्ठेकुशब्दस्तत्रघकारङ·कारछकारयुक्तएवलेख्यः एवंपंचविंशतिकोष्ठेषुअष्टाविंशतिवर्णपूर्णेषुयैर्यैश्चतुर्भिरूर्ध्वाधरालीषुऊर्ध्वाधःपंक्तीषुअइउआदिचतुःकोष्ठेषुअनलभतः कृत्तिकादिनक्षत्रादिचक्रे आसार्पमश्लेषानक्षत्रपर्यंतंअर्णैश्चतुर्भिर्भस्यनक्षत्रस्यपादाःस्युःयथा अइउए इतिकृत्तिकापादाः॥ ओवाविवु इतिरोहिणीपादाः एवमन्येषामपिन

शतपदचक्रम्

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| अ | व | क | ह | ड | म | ट | प | र | त |
| इ | वि | कि | हि | डि | मि | टि | पि | रि | ति |
| उ | वु | कु घ ङ·छ | हु | डु | मु | टु | पु ष ण ठ | रु | तु |
| ए | वे | के | हे | डे | मे | टे | पे | रे | ते |
| ओ | वो | को | हो | डो | मो | टो | पो | रो | तो |
| न | य | भ | ज | ख | ग | स | द | च | ल |
| नि | यि | भि | जि | खि | गि | सि | दि | चि | लि |
| नु | यु | भु ध फ ढ | जु | खु | गु | सु | दु थ झ ञ | चु | लु |
| ने | ये | भे | जे | खे | गे | से | दे | चे | ले |
| नो | यो | भो | जो | खो | गो | सो | दो | चो | लो |



Indira Gandhi National Centre for the Arts

नक्षत्राणां पादाश्चतुर्भिर्विर्वैर्ज्ञेयाः ॥ अथमयादिभपादवर्णानयनमाह ॥ एवमिति ॥ एवं प्रागुक्तरीत्या अन्येषु पंचविंशतिकोष्ठेषु मटपरतवर्णान् अ इ उ ए ओ इति स्वरभेदेन पंचविंशतिसंख्याकान् वर्णान्दद्यात् लिखेदित्यर्थः अत्रविशेषः मध्यकोष्ठे उ युक्तुउकारयुक्तान् षणठान् षकारणकार ठकारान्लिखेत् ॥ ३७ ॥ अथमयादिवर्णानाह ॥ पितृभतोमयानक्षत्रात् ॥ इहमटपरतवर्णेषु आहिर्देवतं विशाखानक्षत्रपर्यंतं सप्तनक्षत्राणां चत्वारः पादाज्ञेयाः नयभजखाश्च पंचविंशतिकोष्ठकेषु लेख्याः भशब्दकोष्ठे धफढाश्च लेख्याः तत्र मैत्रतोनुराधानक्षत्राद्धरिभं श्रवणनक्षत्रावधिकृत्य चत्वारश्चत्वारोभपादाज्ञेयाः ततः पंचविंशतिकोष्ठेषु रामदचल इति पंचवर्णान्स्वरभेदेन पंचविंशतिसंख्यान् लिखेत् दशब्दकोष्ठे चथ कोभ

पितृभत इह भानि चाहिर्दैवं नयभजखाश्च तथा भु युक्थ फोठः ॥ हरिभमवधितश्च मैत्रतः स्युर्गसदचलाव सुभाद्दु यु कथझञः ॥ ३८ ॥ नागै ३० र्नीचै ६० र्निधि ९० ज्ञाभ्रय १२० नभुक १५० मितैः श्वासपर्यायकैर्वात्यम्भं वातोनलोऽम्बुक्षितिरष्टथ गुपर्यंतराधांश्चजुत्वे ॥ इतिक्रमेण लिखेदत्रवसुभाद्धनिष्ठानक्षत्रात् भरणीयावत्सप्तनक्षत्रपादाः प्राग्वज्ज्ञेयाः इति नामनक्षत्रज्ञानम् ॥ ३८ ॥ अथहंसचारोक्तिपूर्वकं स्वरबलज्ञानमाह ॥ नागैस्त्रिंशद्भिर्नीचैः षष्ट्या निधिनवत्या नाभ्रयविंशत्युत्तरशतेन-नभुकसार्द्धेनशतेन च परिमितैर्निश्वासपर्यायकैः निश्वासावृत्तिभिः अभ्रमाप्रकाशः १ वायुः २ तेजः जलं ४ क्षितिश्च ५ वातितत्रैवं संबंधः हृदयकमलजे एकत्र पत्रे प्राच्ये एकांतरार्द्धे मूलमारभ्य त्रिंशन्निः श्वासपर्यायैः आकाशोवातितदुपरिषष्टिं वायुरित्यादि एवं प्रागुक्तसंख्यैर्निश्वासपर्या

Indira Gandhi National Centre for the Arts

यैस्तेजःजलंक्षितिश्चवाति इतराईतुपत्राग्रादारभ्यावनीतोभूमितत्वादारभ्यव्य-
त्यासादुदितत्वक्रमेणप्राणोवाति यथाउपरिपत्रांतेअष्टधक्र इतरेपिपत्रदलेसैवसं-
ख्या १५० अंतरामध्येअवतरंतीसैव १२०।९०।६०।३० संख्याअधोपिप्राग्वत् ऋजुत्वे
प्राक्पत्रार्द्धोक्तसंख्यासन्मुखेस्थितापिसैव ३० संख्याव्यत्यासाद्भवति एवंचव्योमांत-
पंचतत्वानामेकहृत्कमलजेदलार्द्धयोर्मिलितासंख्यासंपद्यतेनानाधीति। ९००अ

व्यत्यासाच्चावनीतोहृदयकमलजेपत्रएकत्रतेन स्वासानानाधिसं-
ख्या ९०० ननरस ७२०० कमलेऽहर्निशोत्रि २१६०० भ्रमोऽत्र ॥३९॥

त्रदलांतरेप्येवमेवसंख्याअष्टगुणासकलकमलेननरस७२०० रूपंत्रिगुणा २१६००अ
होरात्रनिश्वाससंख्याभवतिइतिभवतिअत्रचकमलेऽहर्निशंअहोरात्रेप्राणवायोस्त्रि
राहत्यापरिभ्रमणंतनश्चैकभ्रमसंख्या ७२००उक्तंचषट्शतानिदिवारात्रौसहस्रं-
ण्येकविंशतिः हंसहंसेतिहंसेतिजीवोजपतिनित्यशः ॥ ३९ ॥



अथ प्रागादिदिग्पत्रगामिनि प्राणवायौ या हृच्चित्तवृत्तिस्तां पत्रज्ञानायाह। इन्द्रादिदिशः प्राच्याग्नेयादयः तत्र तासु संचारिणि निश्वसने प्राणवायौ क्रमादेतेषु वस्तुषु चेतो याति यथा प्राच्य पत्रस्थे प्राणे रणाय युद्धाय चेतो गच्छति. आग्नेयपत्रगे तु भोक्तुं चेतो गच्छेत॥ याम्ये तु रुषे क्रोधाय नैर्ऋते तु विषयाय भोगाय पाश्चात्ये तु मुदे हर्षाय वायव्ये तु गमनाय उदीच्ये तु कृपयितुं कृपां कर्तुं ईशान्ये तु नृपास्पदाय राजपदप्राप्तये। चेतो भवेदिति संबंधः पत्रद्वयांतरचरे तु प्राणे परस्यै मुदे निरतिशयपरमानंदाय चेतः स्यात्॥४०॥ अथ पृथ्व्यादितत्त्ववहनफलमाह॥ धराभूः अम्बु आपः शुभं फलं फलतः प्रयच्छतः एतद्वहनकाले तु सः शुभमित्यर्थः। महस्तेजस्तु मिश्रितं शुभाशुभरूपं फलेत् वाय्वाकाशौ तु दुःखदे दुःखं प्रयच्छत इति स्वरशास्त्रार्थ

इन्द्रादिदिग्दलचरे श्वसने रणाय भोक्तुं रुषे च विषयाय मुदे गमाय॥ चेतो भवेत्कृपयितुं च नृपास्पदाय पत्रद्वयांतरचरे तु
मुदे परस्यै॥४०॥ धराम्बुनी शुभे महो विमिश्रितं फलं लभेत॥ मरुन्नभश्च दुःखदे मते स्वरार्थवेदिभिः॥४१॥ हृद्धृपत्रे
इनेन्दू वहत इह तयोः पंच पंचेति घट्यो नाडी १० गुर्वक्षरोक्त्यासुरथ चनतला ३६० स्युर्घटी कथ्यतेऽत्र॥ शुक्लादित्रित्रि
घस्रैर्हिमगुरथ रविः प्रत्युषः प्रोत्थवृत्तः श्रेयः स्यादेकनाड्यां यदि वहति शिखी पंच घस्रैर्मृतिस्तत्॥ ४२॥

ज्ञातृभिराचार्यैः संमतं॥४१॥ अथ हृत्कमलपत्रेषु रविचन्द्रवहनकथनपूर्वकं प्राणवायुसंचारैर्घट्यादिज्ञानमाह इनेन्दू सूर्यचन्द्रौ प्रत्येकं हृद्धृ हृत्कमलदलेऽभिव्याप्य वहतस्तयोः पत्रयोः सूर्यचंद्रवहनात्पंच पंच घट्यो भवति नाडी १० दशगुर्वक्षरोच्चारणैरेकोऽसुः प्राणः कालरूपो भवति नतलाः षष्ठ्युत्तरशतत्रय प्राणप्रमाणैका घटी अत्र शास्त्रे कथ्यते शुक्लादि शुक्लपक्षमारभ्य प्रतिपदादौ त्रिभिर्घस्रैर्हिमगुश्चन्द्रः प्रत्यूषः प्रातः काले पंच घटीर्वाति उनः पंच घटिका अर्कः एवं क्रमेणाहोरात्रं तद्वन्तु चतुर्थ्यादित्रिदिने रविः प्रातस्तावतिकाले वाति एवं कृष्णपक्षे प्रतिपदादिने

Indira Gandhi National Centre for the Arts

ष्वर्कः उनश्चतुर्थ्याशविन्दुः एवंक्रमेणवातः एवमुक्तेषुस्वस्वदिनेषुसोमोरविश्चप्रत्यूषः प्रातःकालेप्रवृत्तः स्यात्तदाश्रेयः कल्याणंस्यात् यदिए
कस्यांचाद्यांसौर्यांवानाड्यांशिखीवन्हितत्वपंचयस्मैदिनपंचकंवहेत्तदामृत्युंविजानीयात् ॥ ४२॥ अथरव्यादिवहनेयुद्धाद्यारंभेजयमाह॥अ
र्केसूर्यनाड्यांअग्नितत्वंचेद्वहेत्तदायुद्धारंभेएकोपिहरेविष्णोः सिंहस्यवाहेलयापद्वहून्हंति अत्रकिंचित्रं। शून्येशून्यनाड्यः वाहहीनायाः पक्षे
रिपून्निक्षिप्यकृत्वासप्टतनातुवाहपक्षेवहन्नाडीपक्षेकृत्वाक्षणेनक्षणमात्रेणकालेनलक्षसंख्यान्शत्रून्निपातिनाशयति॥ अथसूर्यादिना
डीवहनेप्रश्नेविशेषमाह। चन्द्रनाड्यांवामयावहनेवामप्रदेशगतेननरेणप्रश्ने उक्तेनिश्चितम् ॥जयोभवेत्प्रष्टुः सूर्यवहतिदक्षगतेनदक्षिणप्रदेश

अर्केऽग्नितत्ववहनेहरिहेलयापरेकोपिहंतिसुबहून्किमिवात्रचित्रम्॥ शून्येरिपून्स्वपटनामपिवाहपक्षेनिक्षिप्यविक्षि
पतिलक्षमरीन्क्षणेन॥ ४३॥प्रश्नेचन्द्रवहेतुवामगनरेणोक्तेजयोनिश्चितम् ॥सूर्येदक्षगतेनकृच्छ्रविजयीशून्यस्यदूतेस्थि
तिः ॥सूर्येचेद्विषमाक्षराणिशशिनिब्रूतेसमानिध्रुवजेतासौपुरतोपिवामगइहस्यात्पृष्टगोदक्षिणः॥४४॥प्रश्नःश्वासांतर्गमे
चेज्जयःस्याद्भंगोनिर्यात्यत्रसूक्ष्मंतदेतत्॥लाभःपुत्रादेश्चवाहस्यदूतेपृच्छत्युक्तःशून्यगेस्यादसिद्धिः॥ ४५ ॥

स्थितेनपुंसाप्रश्नेकृतेकृच्छ्रविजयीकष्टेनप्रष्टुर्विजयोभवेत् ॥ शून्यदेशेआवहन्नाडीदिशिदूतेप्रष्टरिस्थितेप्रष्टुः क्षतिस्यात्॥ सूर्येसूर्यनाड्यांवहंत्यां
दूतोविषमाक्षराणिएकत्रिपंचादीनिचेद्ब्रूते शशिनिचन्द्रनाड्यांतुसमानिचेद्ब्रूतेतदाध्रुवंनिश्चितंअसौप्रष्टाजेताभवेत्॥ अन्यथापराजयः इहशास्त्रे
पुरस्थोदूतोवामगएवज्ञेयः पृष्टस्थितस्तुदक्षवज्ज्ञेयः॥४४॥ अथप्रश्नेपरंविशेषमाह। पृष्टव्यस्यनिःश्वासादानकालेचेत्प्रष्टापृच्छेत्तदाऽस्यजयः निर्या
तिबहिर्भवति अत्रनिश्वासवायोभंगःस्यात् तदेतत्सूक्ष्मंस्वरयोगांनरेभ्यःकिंचपुत्रादेः पदार्थस्येष्टलाभउक्तः कथमित्याह॥ वाहस्येति। दूतेपृच्छ



Indira Gandhi National Centre for the Arts

केवाहस्थेवहन्नाडीप्रदेशस्थेपृच्छतिसतिशून्यनाडीप्रदेशस्थितेदूतेपृच्छति असिद्धिःस्यात्॥४५॥ अथसूर्यचन्द्रनाडीवहनेकर्त्तव्यकर्माण्याह॥चान्द्रे
वहेचंद्रसंबंधिनीवामनाडीवहनेनृपस्यराज्ञोऽवलोकनंगेहवेशोगृहप्रवेशः पट्टाभिषेकोनृपाणांएतन्मुखंएतदादिकंयत्कर्म शुभंतत्भवेत्॥सौरेतुसूर्यना
ड्यांदक्षिणवहनेतुमज्जनंस्नानंवधूरतिः भुक्तिर्भोजनंयुद्धंएतदादिः अशुभंयत्कर्मतदिहफलप्रदंभवेत् सत्यमितिबुध्यनुकूलं॥४६॥ इतिमरनक्रतो
समरसारव्याख्यानेस्वरबलकथनम्॥ अथरतिविधिंविवशस्त्रीणांमुख्यंद्रावणमाह।अंगनायानार्याः शशिनिवहतिचंद्रेनाडीवहनकालेवाप्येत् वा
चेद्भवेत्।नरस्यपुंसस्तुद्युमणिंसूर्यनाडींलक्षीकृत्यकृशानुरग्नितत्वंवहति तत्रतस्मिन्कालेरतिषुक्रियमाणेषुसानारीमदनवारांनिर्झरंकामजलपूरंस्र

चांद्रेवहेनृपविलोकनगेहवेशपट्टाभिषेकमुखकर्मभवेच्छुभंयत्॥सौरेतुमज्जनवधूरतिभुक्तियुद्धमुख्यमभवेदशुभकर्मफलाय
सत्यम्॥४६॥वहतिशशिनिवाप्येदङ्गनायानरस्यद्युमणिमनुकृशानुस्तत्रकालेरतेषु॥स्रवतिमदनवारांनिर्झरंसाथपुंसा यदि
शिखिनवनीताशक्तिवद्द्रावितास्यात्॥४७॥सुप्तायानिजवहदुष्णरश्मिनाड्यांचंद्रंचेद्वहनगतंपिबेत्तदानीम्॥आमृत्योर्वशयतिता
मिपंतकांतंचंद्रेणद्युमणिवहंसुहुःपिबंती॥ ४८॥

वतिकथमित्याहाथेति।चेत्पुंसाशिखिनीनवनीताशक्तिवत् वन्हौनवनीतपिंडधा
रणेकृतेयथाद्रवत्वंइत्यमुनाप्रकारेणभविताःस्यात्तदास्रवतीतिसंबंधः॥४७॥ अथवशीकरणमाह।शयनीयेभर्तृसन्निधौसुप्तायानार्याः वहनग
तंचन्द्रंवहद्वामनाडीनिश्वासंचेत्स्ववहदर्कनाड्यापिबतदाग्नीमेवकृतेतांनारींआमृत्योस्तस्यामरणंयावत् वशयति॥वशीकरोति इयंनारीचकां
तंवशयतिकिंकुर्वाणास्वचंद्रेणवहद्वामनाड्याभर्तुर्द्युमणिवहंसौरीवहदस्तनाडींसुहुः वारंवारंपिबंतीआददाना॥ ४८ ॥

मोहनंसुरतंमदनयुद्धंकामसमरम्मूर्च्छिरेत्युक्ताचार्याः तन्मदनयुद्धंसुधीर्बुद्धिमान्रणइवसंग्रामेयथाएवंचेत्सुरतेयदिप्रोक्तंबलंआददत्मैथुनंउपैति
तत्तदासुविह्वलांस्वरबलारब्धस्वरतसुखातिशयेनविवशीकृतामनलांद्रावयेत्पूर्वमितिशेषः॥ इतिविधिः॥ ४९॥ अथद्यूतविषयेस्वरबलमाह।
स्वरसौरादिः छायावामदक्षिणादिः अनिलोऽनुकूलादिअर्कोदिग्बलंनकृतोइंदुश्चताहक्रयोगिनीप्राच्यादिदिक्स्थापृष्ठेदक्षेशुभाराहुपृष्ठदिगां
ताभूबलोदिगस्वराक्रांतएषांबलान्यादायअन्येषांचकालवाराद्दप्रहरहोरादीनांबलान्यादायतैर्बलैः सहायैर्द्यूतंक्रीडाविशेषंआबध्नन्कुर्वन्
कुधनंजयत्येवएवशब्दोऽत्रनिश्चयायक्लिंह्रींरणाहुंफट्स्वाहाइतिद्यूतविधिः॥ ५०॥ अथभस्यधारणादिनाजयसाधनान्यौषधान्याह। आ-

मोहनंमदनयुद्धमूर्च्छिरेतत्सुधीरणइवात्रचेद्बलं॥ प्रोक्तमाददुपैतिमैथुनंद्रावयेत्तदबलांसुविह्वलां॥ ४९॥ स्वरच्छायानिलार्केन्दु
योगिनीराहुभूबलैः॥ अन्येश्चद्यूतमाबध्नन्जयत्येवधनंबहु॥ ५०॥ आस्येतालजटाथकेतकिदलंशीर्षेथखार्जूरकं मूलंकस्य-
इषुर्लगेन्नसघृतेभुक्तेरजीर्णैश्चतैः॥ कंसार्युत्तरमूलिकानिरशनैःपुष्यार्कआत्ताधृता जग्धावासहतंडुलांबुभिरथोपाठाजटापी
हशी॥ ५१॥ अंकोलोलक्ष्मणापुंखासर्पाक्षीशिखिचूलिका। विष्णुक्रांताकाकजंघानीलीदेवीचपाटला॥ ५२॥ स्येमुखेतालजटातालहस्त

मूलधृतं॥ शतयातजग्धावासहतंडुलांबुशारयातवारणमित्यग्रेणसंबंधः॥ अथवारणेऔषधांतरंकेतकिदलंकेतकीपत्रंशीर्षेमूर्ध्निधृतंतद्वत्श
रधानवारणायअथान्यत खार्जूरकंइहत्वखर्जूरसंबंधिमूलेरंकस्येक्रोडनिहितेइषुः शरोनलगेत शरीरइतिशेषः सघृतैः घृतसहितैःभुक्तैरजी
र्णैश्चभुक्तमात्रैस्तैः शागुक्तैः। तालमूलकेतकपत्रखार्जूरमूलैः सद्भिर्युद्धेआरब्धेशरः शरीरेनलगेत्॥ कंसारीहिंसेति प्रसिद्धालतातस्याउत्त
रादिकस्यामूलिकामूलनिरशनैः शनाउपोष्यपुष्यार्कयोगे आत्तागृहीताधृताशरीरेसहतंडुलांबुभिर्जग्धाखादिताचशरीरेशरवारणायस्यात
अथपाठाप्रसिद्धातन्मूलमपिईहक्शरीरेशरवारणायस्यादित्यर्थः॥ ५१॥ अंकोलः प्रसिद्धः लक्ष्मणापुरुषाकारमूलौषधिविशेषः पुंखाशरशर



Indira Gandhi National Centre for the Arts

पुंखासर्पाक्षीसर्पनेत्राकृतिउष्णाशिखिचूलिकामयूरशिखाविष्णुक्रांतानीलउष्णाप्रसिद्धाकाकजंघातदाकारानीलीप्रसिद्धादेवीसहदेवीपाद
लात्रसिद्धैवतज्जटानासामोषधीनांमूलानितन्मध्येएकापिजटाभुजेबाहौमूर्ध्निशिरसिधृताआस्येमुखेधृताखादितावारणेसंग्रामेदारुणंश
स्त्रौघंतीक्ष्णशस्त्रसमूहंवारयेत्॥कियत्कालमित्यपेक्षियावदिति॥यावत्पर्यंतमुदरेनजीर्यतिभुक्तपरसेचेतत्॥धारणपक्षेतुयावद्वारणेशास्त्र
वारणं॥५३॥स्वर्णाभास्वर्णवतीनवर्णायासिंहीनाम्नीकाकिनीकपर्दकस्तस्मिन्सिंहीतन्मूलरसेनघृष्टः सिंहीजटासहितःपारदोरसोंतरस्थो
मध्यस्थःसिक्थेनमुद्रेकनमुद्रितःआस्यगोमुखस्थोजयदःरणादौविजयदाता॥५४॥अथवाजयदान्यौषधान्याह॥चक्रमर्दकःचकौडइतिभा

भुजास्यमूर्द्धगाभुक्तातज्जटैकाधिवारयेत्॥रणेदारुणशस्त्रौघंयावज्जीर्यतिनोदरे॥५३॥स्वर्णाभसिंहीकाकिन्यासिंहीघृष्टः
सतज्जटः॥अंतस्थःपारदःसिक्थमुद्रोजयदआस्यगः॥५४॥चक्रमर्दकगोजिह्वाशिखिचूडाजटास्वपि॥एकैकावाद्जयदा
पुष्पार्कांताऽऽस्यमूर्द्धगा॥५५॥भास्त्राणिप्रलिखेदुपर्युपरिचत्रीण्येशादिश्यग्निभाद्वाह्यात्त्रीणिलिखांतराच्छिवभतोप्येंद्र्यांच
सार्ध्यवहिः॥

षापांप्रसिद्धः गोजिह्वागोभीप्रसिद्धाशिखिचूडामयूरशिखाएतासुमध्येएकैकाजटाउष्णार्कयोगेआत्तागृहीताआस्य
गामूर्द्धगावावाद्जयदा॥५५॥इतिश्रीभरतकृतसमरसारटीकायांओषधानिसमाप्तानि॥अथयायिस्थायिनोर्जयपराजयौविवक्षुःकोट
चक्रमाह॥भवर्णेनचतुःसंख्यालभ्यतेततश्चभास्त्राणिचतुरस्राणीत्यर्थः तानिउपर्युपरिचत्रीणिएकस्यचतुरस्रस्यलघुउपरिमहदन्य-
ल्लिखेत् तदुपरिचततोऽधिकमन्यदेवंत्रीणिलिखेदित्यर्थः।तत्रचमध्यस्थंचतुरस्रंकोटचक्रसंज्ञंतेषुचत्रिष्वपिचतुरस्रेषुएेशादिशिऐशा-
न्यांअग्निभात्कृत्तिकानक्षत्रमारभ्यबाह्याच्चतुरस्रादारभ्यत्रिष्वपिकोणेषुऐशान्यामंतर्विंशतित्रीणिमृगशिरोंतानिलिखेतिशिवभनिमंत्र-

Indira Gandhi National Centre for the Arts

णेलोट अंतरान्मध्यवर्तिनः चतुरस्रात् शिवभमार्द्रामारभ्यत्रीणिभानिऐंद्र्यांप्राच्यांदिशिचतुरस्रत्रयप्राग्रेखामध्यस्थानेषुबहिर्निःसरंतिलिखसा
र्प्यम् श्लेषावहिर्वाह्यचतुरस्राद्पिबहिःप्राच्यामेतल्लिखइत्यमुनैवप्रकारेणाग्नेयात्कोणादारभ्यपित्र्यतोमघानक्षत्रात्।यमदिशिदक्षिणस्यां
सप्तमंविशाखाबहिर्न्यस्यंलिख्यमैत्रात् अनुराधात्।वासवतोधनिष्ठाभाद्व अन्ययोर्नैर्ऋतिवायव्ययोः कोणयोः प्राग्वल्लिखेतिसंबंधः।एवंदि
ग्विदिग्वाह्यचतुरस्रेणखयुग्२८द्वादशभानिवहिः चतुरस्रेलिखितानिस्युः मध्येचतुरस्रेचदृंदिग्विदिक्स्थानेअष्टौस्युःअंतःमध्येचतुरस्रेचदं ८अ
ष्टौभानिस्युः एवंकोटचक्रेसाभिजिति अष्टाविंशतिभानिलिखितानिस्युः॥५६॥ कोणाईशानादयस्तत्रलिखितानिकृत्तिकामघानुराधाधनिष्ठा

अग्नेयांदितिपित्र्यतोयमदिशिन्यस्यंवहिः सप्तमंमैत्राद्वासवतोन्ययोःस्वपवहिर्दमध्यमेतच्चदम्॥५६॥ कोणभानिप्रवेशेस्युर्द्वा
दशान्यानिनिर्गमे॥ षष्ठंषष्ठंसप्तकेषुमध्येस्तंभचतुष्टयम्॥५७॥उपलक्षणमेवकृत्तिकादीप्रथमंदुर्गभमेववैरिभंवा॥ ग्रहचक्रमु-
डुस्यमालिखेच्चतुरस्रंचरणंचमध्यमंस्यात्॥ ५८॥ दीनित्रीणित्रीणिभानिद्वादशकोणभानितानिग्रहाणांकोटप्रवेशेभवंतिप्रविशत्त-
यालिखितत्वात् अन्यानिआर्द्राहस्तपूर्वाषाढोत्तरभाद्रपदादीनिचत्वारिचत्वारिप्राच्यादिदिक्षुस्थितानिषोडशभानिनिर्गमेग्रहाणांस्युः नि
र्गच्छतयालिखितत्वात्सप्तकेषु अश्विनीपुष्यस्वात्यभिजिरादिषुचतुर्षुतत्षष्ठंभंआर्द्राहस्तपूर्वाषाढोत्तराभाद्रपदाइतिचत्वारिभानिकोटस्य
मध्येस्तंभचतुष्टयंस्तंभसंज्ञानिस्युः॥५७॥ इदंयत्पूर्वश्लोकेकृतिकादिभलेखनमुक्तंतदुपलक्षणंकृत्तिकादौलेख्मेप्रथमंदुर्गस्थानेदुर्गभंपूर्वो-
क्तावकहडचक्रात।ज्ञातव्ययथापञ्चअंजस्यउत्तराफाल्गुणीति॥तद्दुर्गभंईशानकोणेलेख्यंअन्यानिप्राग्वत् वैरिभंवातत्तद्दुर्गाधिपतेर्वायद्वंअ
वकहडचक्रोत्थं तद्वाईशानकोणेलेख्यमादिभूतंतदग्रेभानिउक्तरीत्यातत्रतत्रलिखेत् तेषुचभेषुग्रहंचक्रंसूर्यचन्द्रादिनवग्रहाउडुस्थंनक्षत्रग २५

Indira Gandhi National Centre for the Arts

ततपालिखेत॥समस्तग्रहाःस्वस्वभुज्यमानेनक्षत्रेस्थाप्याइत्यर्थः॥अत्रकोटचक्रेमध्यमंचतुरस्रंचरणंप्रा-
कारस्थानीयंभवेत॥ ५८॥ अथक्रूरसौम्यादिग्रहावस्थित्यादुर्गभंगरसादिकमाह॥ क्रूराःसौरोन्दुसू-
र्यशनिभौमाः तद्युक्तोबुधश्चस्तेचेदंतः कोटमध्यभेषुस्युःसौम्यखेटाः पूर्वोक्तातिरिक्तास्तेचेद्बाह्यगाव-
हिश्चतुरस्रस्थभेषुस्युः तदातदुर्गभंगोनेयः वैपरीत्याञ्चेत सौम्यामध्येक्रूरास्तुबहिस्तदावेष्टकेतदुर्गचा
रणकेपापिनिसौम्येभंगः क्रूराश्चेदुर्गमध्येसौम्यसौम्यग्रहास्तुवप्रगाःप्राकाररेखास्थभेषुस्युः तदादु

क्रूराः अंतर्बाह्यगाःसौम्यखेटादुर्गेभंगोनेष्टकेवैपरीत्यात॥ क्रूरामध्येवप्रगाःसौम्यखेटाभे-भ
दोभंगश्चाद्रयुद्धंविनापि॥ ५९॥ व्यत्यासेत्वावेष्टकस्यैवभंगोदुर्गेभिन्नेप्युद्भवेन्नात्रमिथ्या॥
प्राकारेतः क्रूरखेटाबहिश्चेत्सौम्याःकृच्छ्राद्दुर्गभंगस्तदानीं॥ ६०॥ वप्रेबाह्येक्रूरखेटाश्चमध्ये
सौम्याखपिंडैःस्यान्नदुर्गस्यभंगः वप्रेसौम्याअंतरेबाह्यतश्च क्रूराभंगःसैन्ययोःस्याद्द्वयोस्तु॥
६१

र्गभेदेदुर्गमध्यगतानांपरस्परंविरोधः अत्रभेदेसतियुद्धंविनापिदुर्गभंगः॥ ५९॥अनंतरोक्तग्रहसंस्था
नव्यत्यासेतुग्रहवशगदुर्गभिन्नेपिआवेष्टकस्यापिनोभंगउद्भवेत॥ अत्रमिथ्याकिंचितनज्ञेयं प्राकारमध्य
चतुरस्रगतनक्षत्रेषु अंतःदुर्गमध्यगतभेषुचचेत्क्रूरग्रहाःस्युः बहिश्चेद्बाह्यचतुरस्रगतभेषुसौम्यग्रहास्त
दाकृच्छ्रात्कष्टाद्दुर्गस्यभंगःस्यात॥ ६०॥ बाह्येप्राकारेक्रूरखेटाः क्रूरग्रहाश्चेत्स्युः मध्येप्राकारेतुसौम्याः तदादुर्गेखंडमात्रंस्यान्नदुर्गभंगः॥



अथ चेद्दुर्गे मध्यमेव तु रस्वे सौम्यग्रहाः अंतरा दुर्गमध्ये वा ह्यत श्चेत्क्रूरास्तदा द्वयोः स्थायियायि सैन्ययोर्भंग एव स्यात्॥ ६१॥ वप्रे क्रूरग्रहाः वा-
ह्य देशे मध्ये च सौम्यग्रहाश्चेत्तदा तुल्यं समं युद्धं द्वयोः सैन्ययोर्भवति अन्वहं प्रतिदिनं च दुर्गैर्खविदुः पतेत् अथ चेद्दुर्गे प्राकारे वाह्ये वहिर्देशे
अंतर्दुर्गमध्ये च यदि क्रूरसौम्या मिलिता ग्रहाः स्युः तदा घोरे रौद्रे युद्धे द्वयोरपि सैन्ययोर्भंगः एवं प्रकारेण स्यात्॥ ६२॥ तुल्याः समाः क्रूराः सौम्याः
ग्रहाश्च ह्यस्थे देशे अंतश्च मध्य देशे च स्युः तदा तु यायिनो दुर्गेशस्य च संधिः प्रीतिर्वाच्या॥ अथान्यदाह ज्ञो बुधः आरो भौमः एतौ चैत्त्तंभन-
स्तत्रगतौ स्तः प्रवेशो कोणभेषु मध्ये कस्मिंश्चित्स्यातां चन्द्रस्तु राहुकालानलचक्रे यानि जीव पक्षनक्षत्राणि तेषां मध्ये कस्मिंश्चित्प्रवेशकोण

वप्रे क्रूरा वाह्य मध्ये तु सौम्यास्तुल्यं युद्धं खंडिपातोन्वहं च। वप्रे वाह्येंतर्यदा क्रूरसौम्या योरं युद्धं स्याद्द्वयोर्भंग एव॥ ६२॥ तुल्या वाह्ये
तच्चचेत्क्रूरसौम्याः संधिर्वाच्यो यायिदुर्गेशयोस्तु॥ ज्ञारौ स्तंभर्क्षे प्रवेशे पिवा चेच्चंद्रो जीवपक्षगः स्यात्प्रवेशे॥ ६३॥ रुंध्याद्दुर्गं चा
कुलौ घे पि युद्धे न्यासेनां तस्य सैन्यं विदध्यात्॥ दिक्स्विज्यारौ काव्यवक्रस्य सौम्यो दुर्गे भंगं निर्दिशंति क्रमेण॥ ६४॥

नक्षत्रे वास्यात् त-
दा दुर्गं रुंध्यादिति अग्रिमेण संबंधः॥ ६३॥ यायिस्वसैन्येनारिदुर्गं रुंध्यात् वेष्टयेत् अकुलौ घे च युद्धे दुर्गं रुंध्यादिति संबंधः अकुलौ घश्च भरणी-
रोहिणीउन॰ अश्ले॰ पूर्वाफा॰ हस्त॰ स्वाति॰ अनु॰ उ॰षा॰ धनि॰ उ॰भा॰ रेवती संज्ञानि भानि १२ प्रतिपत्तृतीया पंचमी सप्तमी नवम्येकादशी त्रयो
दशी पंचदश्यो ष्टतिथयः रविसोमगुरुशनिवाराः इति अस्मिन्नकुलौ घे विद्यमानेऽरिदुर्गं रुंध्यात्तदा तद्भंगः। अथ न्यासासेनेति। अन्तस्य स्वस्था
यिनः सैन्यं यायिना सह युद्धं विदध्यात् न्यासस्त्वेवं बुध भौमौ स्तंभनक्षत्रे न स्यातां न च प्रवेशर्क्षे किंतु निर्गमर्क्षे च चन्द्रोपि मृतपक्षगः न च प्रवेश-
र्क्षे किंतु निर्गमर्क्षे कुलगणे च तदा स्यायी युद्धे तदिक्षु प्राच्यादिषु दुर्गस्य इज्यो गुरुः आरो भौमः काव्यः शुक्रः वक्रस्थ सौम्यः वक्री बुधः एते चेत्क्रमेण ९६

॥ ३४ ॥

यत्र प्राच्यादिदुर्गस्य रेवास्थले क्रूरग्रहस्तेन क्रूरेण युक्तः शशी चंद्रो वा तत्र दुर्गे खण्डिः पतेत् एतस्य क्रूरग्रहस्य मार्गे बाह्यसैन्यप्रवेशो दुर्गेस्यात् प
राक्रूरयत्राः स्तंभनस्तत्रैव अंतर्मध्ये न स्तत्रैस्युस्तदानीं दुर्गाधिनाथो ग्रहबलात् दुर्गं मुक्त्वा यातितनुः पलायते इत्यर्थः ॥ ६५ ॥ निर्गतिनक्षत्राणि पूर्वादि
दिक्षु स्थितानि तेषु मध्ये बाह्यगं यद्भं तस्मिन्वक्रितः क्रूरग्रहश्चेत्स्यात् ॥ तदा निश्चितं तत्र तस्यां दिशि खंडिं कुर्यात् वप्रस्यश्चेत्क्रूरो वक्री तदा दुर्गमु-
ध्ये हंति मध्ये दुर्गमध्ये च प्रवेशर्क्षे चेद्वक्री क्रूरस्तदा बाह्यस्य सैन्यं हंति ॥ ६६ ॥ दुर्गस्य एतदीशस्य दुर्गाधीशस्य च ये भे नक्षत्रयोरैशान्यादौ लिखने इत्यने
नप्रकारेण उत्पन्ने ये कोटचक्रेतयोरिति प्रागुक्तप्रकारे भंगं विचार्य यस्यां दिशि भंगसंभावना तस्यां दिशि बाह्याया पिनो दुर्गे लगंतु तत्र लग्नाश्च दुर्गेग्र-

यत्र क्रूरस्तेन युक्तः शशी वा खण्डिस्तत्रैतत्पथे च प्रवेशाः ॥ क्रूरास्तंभर्क्षे यदां तस्तदानीं दुर्गं मुक्त्वा यातिदुर्गाधिनाथः ॥ ६५ ॥ निर्ग
त्यर्क्षे बाह्यगे वक्रितश्चेत्क्रूरः खण्डिं निश्चितं तत्र कुर्यात् ॥ वप्रस्थों तर्हंति मध्यप्रवेशर्क्षे वक्री चेद्धंति बाह्यस्य सैन्यं ॥ ६६ ॥ दुर्गे तदी
शाभजयो रिति कोटयोस्तु भंगं विचार्य दिशि तत्र लगंतु बाह्याः ॥ आभ्यंतरावलयभोत्थितचक्रदोषे सेनान्यमन्यमपदिश्य दिशोपयंतु
॥ ६७ ॥ पूर्वोदीचीर्लिखालीर्नय १० नय १० गणिताः कद ८१ कोष्ठेष्वथेशात्कर्णैस्तोयस्वरान्वह्न्युडुनइहदिगालीषु भान्यंतरालु।
यद्वत्तु आभ्यंतराद्दुर्गाधिपास्तु बलपोयः सेनाधिपस्तस्य यद्भं तु तत उत्थितोयः कोटचक्रदोषस्तस्मिंजाते अन्यं सेनान्यं अपदिश्योद्दिश्य नामपूर्वकं कृत्वा
दिशोपि दुर्गजा अवंतु रक्षंतु एतदुक्तं भवति। एतद्भूयोक्तप्रकारेण यायिस्थायिना वुभावपिजयतः ॥ ६७ ॥ इति श्रीसमरसारटीकायां कोटचक्रं ॥ अथ
सर्वतोभद्रचक्रमाह। पूर्वाग्राः प्रमुखी उदीचीउदङ्मुखी आल्यो लेख्याः नयनयगणिताः दशादशसंख्याः लिखेदिति संबंधः ॥ अथ एवं प्रागुदीचीनां दश
दशालेखानां लिखनादुत्पन्नकं दकोष्ठकेषु ईशादीशानकोणादारभ्य कर्णैः तोय १६ स्वरान्षोडशाकारादिस्वरान् लिखेदिति संबंधः वह्न्युडुनः कृ

Indira Gandhi National Centre for the Arts

वनि राशौजन्मराशौ विद्धेविघ्नततिर्विघ्नपरंपराभवेत्। पंचसुवर्णनक्षत्रवारतिथिराशिषु विद्धेषु मृतिर्मरणंभवेत्॥ विध्यन्वेधंकुर्वाणः ज्ञोबुधः ईज्यो
गुरुः सितः शुक्रः एतेविध्यंतः क्रमेणप्रज्ञांबुद्धिंसर्वसुखंरतिंचबुधाद्याविदधतेकुर्वंतिइमेबुधगुरुशुक्रावक्राः संताः अत्यंतमिष्टाः सौम्यत्वात् ॥७२
